क्तव्यं। यद्विना ब्रह्मजिज्ञासा न भवति [redacted] यस्मिन्सति भवंती भवत्येव तदिदमुक्तं· यस्य वेदनानियमेना १५

पेक्षत इति॥ स्यादेतत्। धर्मजिज्ञासाया इव ब्रह्मजिज्ञासाया अपि योग्यत्वात् स्वाध्यायानंतर्यं धर्म
वत् ब्रह्मणोप्याम्नायैकसमधिगम्यत्वात्। तस्य चागृहीतस्य स्व[redacted]विषये विज्ञानाजननात्। ग्र
य हणस्य च स्वाध्यायाध्ययन[redacted]व्यस्यैनैनैव नियतत्वात्। तस्मादध्ययनानंतर्यमेव ब्रह्मजि
ज्ञासाया अप्यपभ्रांश्यार्थेऽस्य त आह। स्वाध्यायानंतर्यं तु समानं धर्मब्रह्मजिज्ञासयोः। अत्र च स्वाध्या
येन विषयेण तद्विषयमध्ययनं लक्षयति। तथा च अथातो धर्मजिज्ञासेत्यनेनैव गतमिति नेदं सूत्रमा
रब्धव्यं। धर्मशब्दस्य वेदार्थमात्रोपलक्षणतया। धर्मवत् ब्रह्मणोपि वेदार्थत्वाविशेषेण वेदाध्य
यनानंतर्यं पदेशसाम्यादित्यर्थः। चोदयति। न्विह कर्मावबोधानंतर्यं विशेषो धर्मजिज्ञासातो
ब्रह्मजिज्ञासायाः॥ अस्यायमर्थः विविदिषंति यज्ञेनेति तृतीयाश्रुत्यादीनामंगत्वेन ब्रह्मज्ञाने विनि यज्ञा
योगात्। ज्ञानस्यैव कर्मतयाऽङ्गप्रतिप्रा[redacted]धान्यात्। प्रधानसंबंधाच्चाप्रधानानां पदार्थानां त
तता णां तत्रापि च न वाक्यार्थज्ञाने वेगभावो यज्ञादीनां वाक्यार्थज्ञानस्य वाक्यादेवोत्पत्तेः। नैवाक्यस च
हकारितया कर्मणामपेक्षत इति युक्तं। अवगतकर्मणामपि विदितपदार्थ[redacted]संग तद४
तीनां समधिगतशाब्दन्यायतत्त्वानां गुरुमतप्रधानभूतपूर्वापरपदार्थाकांक्षासन्निधानयोग्यतानु
संधानवतां अप्रत्यूहं वाक्यार्थप्रत्ययोत्पत्तेः। अनुत्पत्तौ वा विधिनिषेधवाक्यार्थप्रत्ययाभावेन त
दर्थानुष्ठानपरिवर्जनाभावप्रसंगः। तद्बोधनस्तुत स्तुष्ठानपरिवर्जने परस्पराश्रयं। तस्मिन्स

तिस्तत्तदर्थानुष्ठानपरिवर्जनं ततश्च तद्धीः ध्य इति । नच वेदांतवाक्यानामेव स्वार्थप्रत्यायनेक
र्मापेक्षा न वाक्यांतराणामिति सांप्रतं विशेषहेतोरभावात् । तत्त्वमसीति वाक्यात्त्वंपदार्थस्य क
र्तृभोक्तृरूपस्य जीवात्मनो निःसंशुद्धब्रह्मैक्यप्रतीनस्वभावेन तत्पदार्थेन परमात्मनाऽैक्यमप्र
कांडाद्गाीसेव प्रतिपत्तुमापाततो [illegible] योग्यताविरहनिश्चयात् । यत्तत्पदान तन्नक्तं
श्र६ निर्मला [illegible] विशुद्धसत्वा [illegible] नायोग्य [illegible] तावगमपुरःसरं तादात्म्यमवगमिष्यतीति चेन्न सि
[illegible] । तत्किमिदानीं प्रमाणाकारणं योग्यतावधारणमप्रमाणत्वं । कर्मणो वस्तुमध्यवसितौ
प्रसक्षाद्यतिक्रं वा कर्मापि प्रमाणं वेदांताविरुद्धतन्मूलन्यायबलेन तु योग्यतावधारणोपपत्ते
कर्मभिस्तस्मात्तत्वमसीत्यादेः श्रुतमर्थेन ज्ञानेन जीवात्मनः परमात्मभावं गृहीत्वा तन्मूलया
चोपपत्त्याऽवस्थाप्य तदुपासनाया भावनापराभिध्यानाया दीर्घकालादरनैरंतर्यवत्या ब्र
साक्षात्कारफलायां यज्ञादीनामुपयोगः । यथाहुः सतु दीर्घकालनैरंतर्यसत्कारसेवितो
दृढभूमिरिति ब्रह्मचर्यतपश्रद्धाययज्ञादयश्च सत्काराः । अतएव श्रुतिः तमेव धीरो विज्ञाय प्र
ज्ञां कुर्वीत ब्राह्मण इति विज्ञाय तत्त्वोपकरणेन शब्देन प्रज्ञां भावनां कुर्वीतेत्यर्थः । अ
त्रयाज्ञादीनां श्रेयःपरिपंथिकल्मषनिबर्हणद्वारेणोपयोग इति केचित् । पुरुषसं
स्कारद्वारेणेत्यन्ये । यज्ञादिसंस्कृतो हि पुरुषः आदरनैरंतर्यदीर्घकालैरासेवमानो ब्रह्म १६

भावनामनाघविद्यावासनांसम्मलुकार्षकषतितत्तोस्यप्रयगात्मप्रसन्नाः केवलो विपाठीभव
पद्देश्च ति। अतएवस्मृतिः महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः। यस्यैते ष्टाचत्वारिंशत्संस्कारा इति ॥ च। अपरे
तु रूरात्र यायाकरणे न ब्रह्मज्ञानोपयोगं कर्मणामाहुः। अस्ति हि स्मृतिः। क्षराणि त्रीणि दायपालस्य
मनोमोक्षेनिविशयेदिति। अन्येतु तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन सात्विक्रति
ज्यः तत्तत्फलाय चोदितानामपि कर्मणां संयोगपृथक्त्वेन ब्रह्मभावेच्छं आचक्षते। ते सर्वथैव
दिरत्व सावीयोर्थतामेकस्य तु भयत्वे संयोगपृथक्त्वमिति न्यायात्। अतएव सूपारमर्षं सूत्रं सर्वापेक्षा च
चयज्ञादिश्रुतेरश्ववदिति यज्ञेन तपोदानादि सर्वं तरत्येव ब्राह्मणभावनेत्यर्थः। तस्माद्यदि श्रुत्यादयोः प्र
मायादि चयाम्मर्षस्त्रं सर्वैर्याय यज्ञादिकर्मसमुच्चिता ब्रह्मोपासना विद्योपरात्रयवस्थानाघवि
घातकवासनासमुपच्छेदक्रमेण ब्रह्मसाक्षात्काराय मोक्षापरनाम्ने कल्प्यते इति तदर्थे कर्मापनुष्ठे
यानि। न चैतानि दृष्टादृष्टसाम्यविधिकाः ऽराऽपकार हेतुभूतोपदेशि। कातिदेशिकत्वमपर्यंतागम्या
२ मस्तिततपरस्परविभिन्नकर्मस्वरूपतदधिकारिभेदपरिज्ञानं विनाशक्यानुष्ठातुं। न च धर्ममीमांसा
परिशीलनं विना तत्परिज्ञानं तस्मात्साधनत्वं कर्माणबोधानं तयोर्विशेषपद्धतिकर्मीवबोध्ये नहि का
र्मनुष्ठानसाहित्यं भवति ब्रह्मोपासनायाइत्यर्थः। तदेतन्निराकरोति नत्विति। कर्माववोधाद्यागप्य
धीतवेदांतव ज्ञाजिज्ञासोपपत्तेः इत्यसूत्राकृतं। ब्रह्मोपासनयाभावनापराभिधानयाकर्माण्यपेक्ष्यंत

न्तु कं। अत्र ब्रूमः। क्व पुनरस्याः कर्मापेक्षा। किं कार्ये यथाग्नेयादीनां परमापूर्वे चिरभाविफलानुकूले जनयितव्ये
समिदाद्यपेक्षा। स्वरूपे वा यथा तेषामेव व्रीहिवत्त पुरोडाशादिद्रव्यान्तरे वृत्ताद्यपेक्षा। न तावत्कार्ये तस्य विकल्पास
हत्वात्। तथाहि। ब्रह्मोपासनायाः ब्रह्मस्वरूपसाक्षात्कारः कार्यमभ्युपेयः। स चोत्पाद्यो वा स्यात्। यथा संयवन
स्य पिंडः। विकार्यो वा यथावघातस्य व्रीहयः। संस्कार्यो वा। यथा प्रोक्षणस्योलूखलादयः। आप्यो वा यथा दोहनस्य प
व यः। न तावदुत्पाद्यः। न खलु पटादिसाक्षात्कार इव जडस्वभावेभ्यः पटादिभ्यो भिन्नेन्द्रियाद्युत्पाद्यो ब्रह्मसाक्षात्कारो भाव ड़ं
नाधेयः संभवति। ब्रह्मणोऽपराचीनप्रकाशतया तत्साक्षात्कारस्य तत्स्वाभाव्येन नित्यतया साध्यत्वानुपपत्तेः। ततोभिन्न
स्य च भावनाधेयस्य साक्षात्कारस्य प्रतिभाप्रत्ययवत् संशयाक्रांततया प्रामाण्यायोगात्। तद्भिन्नस्य तत्सामग्रीक
स्य बहुलं व्यभिचारोपलब्धेः। न खल्वनुमानविरुद्धं वह्निं भावयतः शीतातुरस्य शिशिरमरुमंथरतरकंपकांडस्य
स्फुरज्ज्वालजटिलानलसाक्षात्कारः प्रमाणांतरेणासंवाद्यते। विसंवादस्य बहुलमुपलंभात्। तस्मात्सामग्रीवासाक्षा
त्कारलक्षणकार्याभावान्नोपासनाया उत्पाद्ये कर्मापेक्षा। न च कूटस्थनित्यस्य सर्वव्यापिनो ब्रह्मण उपासनातो विका
रः संस्कारप्राप्तयः संभवंति। स्यादेतत्। मा भूद्ब्रह्मसाक्षात्कार उत्पाद्यो ब्रह्मरूपो वा उपासनायाः। संस्कार्यस्तु अनिर्वच स्तृ
णीयानाद्यविद्याद्वयापिधानापनयनेन भविष्यति प्रतिसीरापिहितानर्तकीच प्रतिसीरापनयनद्वारा
रंगव्याप्तेन तत्र कर्म रागमुपयोगः। एतावांस्तु विशेषः प्रतीरापनयेपा[illegible]षदानां नर्तकीविषयः स्ती
साक्षात्कारो भवति। इह तु अविद्यापिधानापनयनमात्रमेव नापरस्तु साधमस्ति। ब्रह्मसाक्षात्कार
स्य नित्यत्वेनानुसाध्यत्वात्। अत्रोच्यते। का पुनरियं ब्रह्मोपासनाविशाब्दज्ञानमात्रसंततिः। आहोस्वि २७

ब्र० शां० भा० ख० १

विचिकित्सातो ब्रह्मज्ञानसंततिः। यद्विषया ब्रह्मज्ञानमात्रसंततिः। किमयमभ्यस्यमानापि अविद्यामु
च्छेत्तुमर्हति। तत्त्वविनिश्चयस्तदभ्यासो वा न हि स्थाणुर्वा पुरुषो वेति वा रोलपरिणामवत्+सत्यास
नेविपर्यासमुन्मूलयेत्। न संशयाभ्यासः सामान्यमात्रदर्शिनो भ्यासो वा ×इदव्यभिति वाशनश्श
पि विज्ञानमभ्यस्यमानं पुरुष एवेति निश्चयाय पर्यालमस्मन्ने विशेषदर्शनात्। ननु तत्त्वश्रुतमये
न ज्ञानेन जीवासनः परमात्मभावं गृहीत्वाप्रतिमयेन च व्यवस्थाप्येति तत्स्मान्निर्विचिकित्स
शाब्दज्ञानसंततिरूपोपासनाकर्मस्तत्कारि सय विद्याद्वयोच्छेदहेतुः। न चासावनुसादित्त
ब्रह्मानुभवात्तदुच्छेदात् पर्यालमासा साक्षात्काररूपो हि विपर्यासः साक्षात्काररूपेणैव तत्त्वज्ञा
नेनोच्छिद्यते। ननु परोक्षावभासेन दिग्मोहालातचक्राचलद्रुमरुमरीचिसलिलादिविभ्रमे
ष्वपरोक्षावभासिष्वपरोक्षावभासिन्यपि रे वह्निमादितत्तत्प्रत्यये निवृत्तिदर्शनात्। नो खल्वाप्तव
चनलिंगादिविनिश्चितदिग्मादितत्त्वानां दिग्मोहादयो निवर्तन्ते तस्मात् त्वंपदार्थस्य तत्पदार्थत्वेन साक्षा
कार एषितव्यः। एतावतात्त्वंपदार्थस्य दुःखित्वशोकित्वादि साक्षात्कारनिवृत्तिर्नान्यथा। न चैष सा
क्षात्कारो मीमांसासहितस्यापि शब्दस्य प्रमाणस्य फलमपि तु प्रत्यक्षस्य तस्यैव तत्फलत्वनिय
मात्। अन्यथा कुटजबीजादपि वटाङ्कुरोत्पत्तिप्रसंगात्। तस्मान्निर्विचिकित्सवाक्यार्थभावनाप
रिपाकसहितमंतःकरणं त्वंपदार्थस्यापरोक्षस्य तत्तदुपाध्याकारनिषेधेन तत्पदार्थतामनु

भावयतीतियुक्तं। नचायमनुभवो येन नजन्येतापितु अंतःकरणस्यैव वृत्तिभेदो ब्रह्मविषयो
नचैतावता ब्रह्मणो नापरोक्षीनप्रकाशत्वानहि शाब्दज्ञानप्रकाश्यं ब्रह्मस्वयंप्रकाशं नभवति॥
सर्वोपाधिविहीनं हि स्वयंज्योतिरितिगीयते। नत्तूपहितमपि यप्याह स्म भगवान्भाष्यकारः नायमे
कांतेनविषयइति। नचांतःकरणवृत्तावप्यस्य साक्षात्कारे सर्वोपाधिविनिर्मोकः तस्यैव तदुपा
धिवि धेर्विनश्यदवस्थस्य स्वपरोपाधिनो विद्यमानत्वात्। अन्यथातु चैतन्यच्छायापत्तिं विनांतःकरणा
वृत्तेः स्वयमचेतनायाः प्राकाश्यानुपपत्तेः साक्षात्कारत्वायोगात्। नचानुमितजीवितवह्निसाक्षात्का
मा र वत्प्रतिभासेनाप्रामाण्यं तत्र वह्निस्वलक्षणस्य परोक्षत्वात्। इह तु ब्रह्मस्वरूपस्यापाधिकलुषि
तस्य जीवस्यागम्यापरोक्ष्यात्। नहि शुद्धत्वादयो वस्तुतस्तत्तोगतिरिच्यंते जीव[redacted]तत्तदुपा
धिरहितः शुद्धबुद्धादिस्वभावो ब्रह्मेतिगीयते। नहि तदुपाधिविरहोऽपि तत्त्वातिरिच्यते। तस्मा
द्यथागांधर्वशास्त्रार्थज्ञानाभ्यासाहितसंस्कारसचिवः श्रोत्रेंद्रियेण षड्जादिस्वरग्राममू
एवं र्छनाभेदमध्यक्षमनुभवतितद्वेदांतार्थज्ञानाभ्यासाहितसंस्कारो जीवस्य ब्रह्मभावमंतः
करणेनेति। अंतःकरणवृत्तौ ब्रह्मसाक्षात्कारे जनयितव्येऽस्तितदुपासनायाः कर्मापेक्षेति
नतस्याः कर्मानुष्ठानसहभावाभावेन तत्सहकारित्वानुपपत्तेः। नखलु तत्त्वमसीत्यादिः वाक्या
त्निर्विचिकित्सं शुद्धबुद्धोदासीनस्वभावकर्तृत्वाद्युपेतमपेत ब्राह्मणत्वादिहं इति रिक्तमेव जातिरे

म ४ दि

मात्मानं प्रतिपाद्यमानः। कर्मस्वधिकारमेव वोढुमर्हति। अनर्हः कथं कर्त्ता वा अधिकृतो वा प्र
युच्यते तन्निश्चितेपि तत्त्वे विपर्यासनिबंधनो व्यवहारोऽनुवर्त्तमानो दृश्यते। यथा गुडस्य माधुर्ये वि
निश्चयेपि पित्तोपहतेंद्रियाणां तिक्तप्रत्यासानुवृत्तिरबाध्य ध्वलस्य सागात्। तस्मादविद्यासं
स्कारानुवृत्त्या कर्मानुष्ठानं तेन च विद्यासहकारिता तत्समुच्चय उपपद्यते। न च कर्माविद्यासं स्य
कं कथमविद्यां छिनत्ति। कर्मणो वा तद्भेदकस्य कुतो भेद इति वाच्यं। सजातीयस्वपरविरो
धिनां भावानां बहुलमुपलब्धेः। यथा पयः पयोंतरं जरयति स्वयं च जीर्यतीति। यथा विषं विषांतरं श
मयति स्वयं च शाम्यति। यथा वा कतकरजोंतरा विलेपाद्य सिद्धसिक्तं रजोंतरानिभिंदत्स्वयमपि म
लिनमानं मलाविलेपाद्यः करोति। एवं कर्माविद्यात्मकमपि अविद्यांतरादीन् अपगमयत्स्व
सहस यमप्यपगच्छतीति। अत्रोच्यते। सदेव सोम्येत्युपक्रमात् तत्त्वमसीत्यंतात् छ्वेदांतसंदर्भात् ब्रह्म
मीमांसोपकरणात् असर्वहस्यस्तानि विचिकित्सेः नाद्यविद्योपादानदेहाद्यतिरिक्तप्रत्य
गात्मतत्त्वावबोधे जातेपि अविद्यासंस्कारानुवृत्त्या तावदनुवर्त्तते सांसारिकाः प्रत्ययाः। तद्व
रा बलोऽस्य तद्यपि तानप्ययं व्यवहारप्रत्ययान्मिथ्येति मन्यमानो विद्वान् ऋद्धत्तेपित्तोपहतें
द्रियस्य गुडे तिक्तस्य सत्यं जल्पितस्यतित्कतां। तथा चायं क्रियाकर्तृकरणेति कर्त्तव्यताफ
लप्रपंचमतात्त्विकं विनिश्चिन्वन् कथमधिकृतो नाम। विदुषो ह्यधिकारोऽन्यथा पशुशूद्रादीनां २२

मप्यधिकारो दुर्वारः स्यात्। क्रियाकर्त्रादिस्वरूपविभागांश्च विद्वत्समान इह विद्वानभिम
तः कर्मकांडे अत एव भगवानविद्वद्विषयत्वं शास्त्रस्य वर्णयांबभूव भाष्यकारः। तस्माद्यथा
राजजातीयाभिमानकर्तृके राजसूये न विप्रवैश्ययोर्जातीयाभिमानिनो ऽधिकारः एवं द्विजा
गी तिकर्तृकक्रियाकलापादिविभागाभिमा[illegible]निकर्तृके कर्मणि न तद्रहि[illegible]मानिनो ऽधिकारः। न चानधिक ॥ न
कृ तेन समर्थेनापि कृतं वेदविद्वाकर्म फलाय कल्प्यते। वैश्यस्तोमं वा ब्राह्मणराजन्याभ्यां तेन दृष्टार्थं
त्वात् कर्मस्तु अशक्तः प्रवर्तमानः प्रा[illegible]तु फले दृष्टत्वात्। अदृष्टार्थेषु तु शास्त्रैकसमधिगम्य
फलमनधिकारिणि न स्यात् इति नोपासनायाकार्यकर्माप्येषा। स्यादेतत्। मनुष्याभिमा
नवदधिकारिके कर्मणि विहिते यथा तदभिमानरहितस्यानधिकार एवं निषेधविधयो
ऽपि मनुष्याधिकारा इति तदभिमानरहितस्तेष्वपि नाधिक्रियेत पश्वादिवत्तस्य यथा चायं निषिध्य
मानोऽतिष्ठन् न प्रसवेयात् तिर्यगादिवदिति भिन्नकर्मतापातः। मैवं। न खल्वयं सर्वथा मनुष्याभि
मानरहितः किंतु विद्यासंस्कारा[illegible]नुवृत्तस्यास्य मात्रया तदभिमानोऽनुवर्तते ऽनुवर्तमानं चाभि
व्येतिभिभूयमानो न शनैः तेऽनुवर्तते। [illegible] किमतो यद्येवं तर्हि ततो न प्रवृत्तिविधिषु प्रागेवाधिकारी न
[illegible]ः ततश्च मनुष्याद्यभिमानेन प्रद्ध्यानो न विधिशास्त्रेणाधिक्रियते तथा च स्मृतिर[illegible]। १९

कं० २

तंद यादृशं निःसारित्वादिकानि विध्यशास्त्वं तत्र नस्तद्भ्रमपेक्षते अपितु निष्पद्यमानक्रियोन्मुखेनान
रस्येव प्रवर्तते। तथा च सांसारिकाइव शब्दावगतेश्चोपि निर्विद्य मतिं स्मप्रवर्तमानः प्रसर्वेति ब्रूलत
त इति न भिन्नकर्मदर्शनाभ्युपगमः समानोपासनायाः कार्ये कर्मापेक्षा। अत एव नोपासनेनोत्पत्ताव
पि निर्विचिकित्सशाब्दे तेनोत्पत्त्युत्तरकालमनधिकारः कर्मणामुक्तः। तथा च स्मृतिः न कर्मणा
न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः। तत्किमिदानीमनुपयोग एव सर्वेषां कर्मणां तथा च
विविदिषंति यज्ञेन दानेन तपसेत्यादिश्रुतयो विरुध्येरन् न विरुध्येरन्। आराद् उपकारकत्वात्
कर्मणां यज्ञादीनां तथाहि। तमेतमात्मानं वेदानुवचनेन नित्यस्वाध्यायेन ब्राह्मणा विविदिष
न्ति विविदितुमिच्छंति ननु विदंति वस्तुतः प्रधानस्यापि वेदनस्य प्रकृत्यर्थतया शब्दतो गुणत्वादिच्छायाः प्र
त्ययार्थतया प्राधान्यात् प्रधानेन च कार्यसंप्रत्ययात्। न हि राजपुरुषमानयेति वस्तुतः प्राधान्यमपि राजा
पुरुषविशेषणतया शब्दत उपसर्जनं आनीयते अपितु पुरुष एव शब्दतस्तस्य प्राधान्यात् एवं वेदानुवच
नस्येव यज्ञस्यापि विविदिषासाधनतया विधानं एवं तपसो अनाशकस्य कामानशनमेव तपः हितमितमेध्या
शिनो हि ब्रह्मविविदिषा प्रवर्तते ननु सर्वथानश्नतो मरणात् नापि चान्द्रायणादितपःशीलस्य धातुवैषम्याप
त्तेः एतानि च नित्यान्युपात्तदुरितनिबर्हणेन तु रूपं संस्कुर्वंति स ह वा आत्मयाजी यो वेदेदं मेऽनेनांगं संस्क्रियत इ तथा च स्मृतिः
दमेनेनांगमुपधीयत इति अनेनेति हि प्रवृत्तयज्ञादिपरा श्रुतिः स्मृतिश्च यस्यैते अष्टाचत्वारिंशत्संस्कारा इति। नित्य
नैमित्तिकानुष्ठानप्रक्षीणकल्मषस्य विशुद्धसत्त्वस्याविदुष एवोत्पन्नविविदिषस्य ज्ञानोत्पत्तिं दर्शयत्याथर्वणी श्रुतिः
ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमान इति स्मृतिश्च ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः इत्यादिका क्लि
विशुद्धसत्त्वस्ततस्तु तपः पश्यति निष्कलं ध्यायमान

एवं च सति।

तेनैव वचनेन संन्यासिनो कर्म सांगं निषिध्यते इति नो अपात्त...उदितं तर्हि बहिर्मोक्षफलं पूर्वसंस्कारेण ज्ञानोत्पन्नावेग भावोपपत्तेर्न
संयोग एकेन साक्षाद्यानाभावकृतः कल्पनागौरवापत्तेः तथा हि। नित्यकर्मानुष्ठानाद्धर्मोत्पादः। ततः पापहानिः ततः सत्त्व
नित्यात्म्यचिदुःखरूपे संसारे नित्यशुचिदुःखस्वयाथा... तिलक्षणेन विपर्यासेन चित्तसत्त्वं मलिनयति। अतः पापनिवृ
त्तौ प्रत्यक्षोपपत्तिश्रवणे सिद्धापापावरणे सति प्रत्यक्षोपपत्तिभ्यां संसारस्यानित्याशुचिदुःखरूपतामत्र एवमवबु
ध्यते। ततो स्यास्मिन्ननभिरतिसंज्ञं वैराग्यमुपजायते। ततस्तज्जिहासोपावर्तते। ततो हानोपायं पर्येषते। पर्येषमा
प णश्चात्मतत्त्वज्ञानस्योपायं स्वश्रेष्ठं सत तज्जिज्ञासते ततः श्रवणादिना आत्मानं जानाति इत्यारादुपकारकत्वं तत्त्वज्ञा
नोत्पादं प्रति चित्तसत्त्वशुद्ध्या ... कर्मणामुक्तं। इममेवार्थमनुवदतीति भगवद्गीता। आरुरुक्षोर्मुनेर्योगं कर्म कारण
मुच्यते। योगारूढस्य तस्यैव शमः कारणमुच्यते। एवं वचनानुष्ठितकर्माभिप्राय वीर्यकर्मवशात्ततो विशुद्धस
त त्त्वः संसारस्यासारतादर्शनेन निष्पन्नवैराग्यः कृतस्य कर्मानुष्ठानेन वैराग्योत्पादे प्रयोगिनाशाय स्नानीयकर्मानु
ष्ठानादेव नत्सिद्धिः। इममेव च पुरुषधौरेय भेदमभिप्रेत्य संन्यासवत् श्रुतिर्यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेदि
ति तदिदमुक्तं। कर्मावबोधात्प्रागप्यधीतवेदांतस्य ब्रह्मजिज्ञासोपपत्तेरिति। अत एव न ब्रह्मचर्यादिष्वाश्रमा
निसंतति येन तदपाकरणार्थं कर्मानुतिष्ठेत्। एतदनुरोधाच्च जायमानो वै ब्रा... ऋणवानिति तिस्रहस्थः ऋणत्रिभिः
संपद्यमान इति व्याख्येयं। अन्यथापि यदि चेतरथा ब्रह्मचर्यादेव इति श्रुतिर्विरुध्येत। गृहस्थस्यापि ऋणापाकरण ऋ.सं. १५६
स्य स्वयार्थमेवाजरामर्यं वादो भस्मांततावादस्त्रो तेषु यज्ञकर्मजनाने विदुषः प्रति। न चास्तत्त्वं पंडितानां तस्मा
त्स्यानंतर्यमथशब्दार्थो यद्विना ब्रह्मजिज्ञासा न भवतीति किं तत्तत्सति भवन्ती भवत्येव। न चैवं कर्मावबोधः। तस्मा
न्न कर्मावबोधानंतर्यमथशब्दार्थ इति सर्वमवदातं। स्यादेतत् भाष्यकृदग्निहोत्रयवागूपाकवदार्थक्रमः श्रौतक्र
मं विष्यतिरन्भिरुवावनी भवेत् वनी भूत्वा प्रव्रजेदिति जाबालश्रुतेः। गार्हस्थ्यं नहि यज्ञाद्यनुष्ठानं सूचयति स्मर
ति च। अधीत्य विधिवद्वेदान्पुत्रांश्चोत्पाद्य धर्मतः। इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत्। निंदति चानधीत्य २

कौ० स्वर्गमस्य हि दर्शपौर्णमासाधिकृतस्य पशुकामस्य सतो दर्शपौर्णमासक्रत्वर्थाप्प्रणयनाश्रिते गोदोहने
धिकारः। न खलु गोदोहनं द्रव्यमव्याप्रियमाणं साक्षात्पशुं भावयितुमर्हति। न च व्यापारान्तराविष्टमुपात्त
मतस्तदङ्गक्रममप्यतिपतेत्। अप्प्रणयनाश्रितं च जानीयतश्चमसेनापः प्रणयेत् गोदोहनेन पशुकामस्येति
सामर्थ्याहात् व्याप्तत्वाच्चास्याप्प्रणयनं प्रति तत्साहित्यक्रत्वर्थाप्प्रणयनाश्रितत्वा गोदोहनस्य तत्क्रमेण
पुरुषार्थमपि गोदोहनं क्रमवदिति सिद्धं श्रुतिलिङ्गादिकरणे न चेष्टिसोमक्रमवदपि क्रमोपादातव्यो विदि
तव्यः। शेषशेषित्वाभिसम्बन्धिकृताधिकाराभावेऽपि क्रमो विवक्ष्येत यद्येकफलावच्छेदो न केवलं। यथाग्नेयादीनां
षण्णामेकस्वर्गफलावच्छिन्नानां यदि वा जिज्ञास्यब्रह्मांशो धर्मः स्यात्। यथा चतुर्लक्षण्यां साधब्रह्म
कैनचित् केनचिदंशेन केनचिल्लक्षणेनाव्युत्पादिते तत्र चतुर्लक्षण्यां लक्षणानां जिज्ञास्यांशभेदेन परस्पर
संबन्धे सतीति क्रमो विवक्षितः। तथेहाप्येकजिज्ञास्यतया धर्मब्रह्मजिज्ञासयोः क्रमो विवक्ष्येत। न त्वेतदुभयमप्य
स्तीत्याह। फलजिज्ञास्यभेदाच्च। फलभेदं विभजते। अभ्युदयफलं धर्मज्ञानमिति। जिज्ञासायाः वस्तुतो ज्ञानतन्त्र
त्वात् ज्ञानफलं जिज्ञासाफलमिति भावः। न केवलं स्वरूपतः फलभेदस्तदुत्पादनप्रकारभेदादपीत्याह। तच्चा
तरा५ नुष्ठानापेक्षं ब्रह्मज्ञानं च नानुष्ठानापेक्षं शाब्दज्ञानाभ्यासान्नानुष्ठानान्तरमपेक्षते। नित्यनैमित्तिकर्मानु
ष्ठानसहभावस्यापाततः त्वादिति भावः। जिज्ञास्यभेदमाह भव्यश्च धर्म इति। भविता भव्यः कर्तरि क
र्तः भविता च भावकव्यापारनिर्वर्त्यतया तत्त्वच्छतीति। ततः प्राक् ज्ञानकाले नास्तीत्यर्थः। भूतं सत् सदेकान्ततः न
कदाचिदसदित्यर्थः। न केवलं स्वरूपतो जिज्ञास्ययोर्भेदो ज्ञापकप्रमाणप्रवृत्तिभेदादपि भेद इत्याह चोदनाप्रव
त्तिभेदाच्च। चोदनेति वैदिकं शब्दमाह। विशेषेण सामान्यस्य लक्षणात्। प्रवृत्तिभेदं विभजते। या हि चोदना २१

धर्मस्येति। आप्तादीनां पुरुषाभिप्रायभेदानामसंभवात्। अपौरुषेये वेदे चोदनोपदेशः अतएवोक्तं
तस्य ज्ञानमुपदेश इति। साध्यसाध्ये च पुरुषव्यापारे भावनायां तद्विषये च यागादौ सा हि भावनाविषयः तद
धीननिरूपणं चास्य प्रयत्नस्य भावनायाः। विधिवचनं इह स्ते तस्य चात्र विषयपदं उत्पत्ते भावनायास्तदारभ्या
च यागादेरपेक्षितोपायतामवगमयती तत्र कोपकारकत्वेन पुरुषं नियुंजानैव चोदना यागादिधर्ममवबो
धयति। नान्यथा। ब्रह्मचोदना तु पुरुषमवबोधयत्येव केवलं न तु प्रवर्त्तयंती अवबोधयति। कुतः। अवबोधस्य
प्रवृत्तिरहितस्य चोदनाजन्यत्वात्। ननु आत्मा ज्ञातव्य इत्येतद्विधिपरैर्वे[illegible]दांतैस्तदेकवाक्यतयावबोधे
ध निवर्त्तयद्भिरेव पुरुषो ब्रह्मावबोध्यत इति स्मार्त्तं धर्मचोदनाभिर्ब्रह्मचोदनामित्यत आह। न पुरुषाववबोधेन नि
युज्यते। अयमभिसंधिः न तावद्ब्रह्मसाक्षात्कारे पुरुषो नियोक्तव्यः। तस्य ब्रह्मस्वाभाव्येन नित्यत्वादकार्यत्वा
त्। नाप्युपासनायां तस्या अपि ज्ञानप्रकर्षहेतुभाव[illegible]स्यान्वयव्यतिरेकसिद्धतया प्राप्तत्वेनाविधेयत्वात्। ना
पि शाब्दज्ञानबोधे तस्याप्यधीतवेदस्य विदितपदतदर्थस्य समधिगतशाब्दन्यायतत्त्वस्याप्रत्यूहमुत्पत्तेः। अत्रै
व दृष्टांतमाह। यथा शास्त्रार्थेति। दार्ष्टांतिके योजयति। तद्वदिति। अपि चात्मज्ञानविधिपरेषु वेदांतेषु न आत्मतत्त्वविनिश्च
यः शाब्दः स्यात्। न हि तदा आत्मतत्त्वपरास्ते किं तु तज्ज्ञानविधिपरा यत्परा श्रुतिः स एव ते[illegible]षामर्थः। न च बोध्यस्य बोध्य
मयेद्वातमात निष्ठत्वात् अन्यपरेभ्योपि बोध्यतत्त्वविनिश्चयः समारोपेणाप्युपपत्तेः। तस्मान्न बोधविधिपरा वेदांता इति सि
द्धं। प्रकृतमुपसंहरति। तस्मात् किमपि वक्तव्यमिति यस्मिन्नसति ब्रह्मजिज्ञासा न भवति सति तु भवंती भवत्येवेत्यर्थः। तदा
ह। उच्यते नित्यानित्यवस्तुविवेक इत्यादि। नित्यः स्वयमात्मा अनित्या देहेंद्रियविषयादयः। तद्विषयश्चेत् विवेको निश्चयः॥

रात्तमस्य ब्रह्मजिज्ञासया ज्ञा तत्वान्तब्रह्मस्वरूपः। अथ विवेको ज्ञानमात्रं न निश्चयः। तथात्वे त्वेषविपर्यासादन्यः सं
भावः स्यात्। तथा च न वैराग्यं भावयेत्। अभावयन् कथं ब्रह्मजिज्ञासा[redacted]हेतुः॥ तस्मादेवं व्याख्येयं नित्यानित्ययोर्वि
[redacted]सतीति नित्यानित्यवस्तु तद्धर्मः नित्यानित्ययोर्धर्मिणोर्धर्मयोश्च विवेको नित्यानित्यवस्तुविवे
कः एतदुक्तं भवति। आभ्यदिदं तत्तदनित्यमिदमनुगतं नित्यमिति धर्मिविषयो विवेकः। धर्ममात्रे यो नित्यो
नित्ययोस्तद्धर्मयोश्च विवेकनिश्चयो नोत्पन्न नित्यत्वं सत्यत्वं तद्धि स्यात्तिरतानित्यं सत्सतः। तथा चास्य गोचरो। अ
नित्यत्वमसत्यत्वं तद्घस्यात्ति तदनित्यं अनेन तत्तथा चानात्मगोचरो। तत्तेषु अनुभूयमानेषु सुखभरमसत्ययगोच
रेषु विषयविषयिषु यदेतं नित्यं सुखं व्यवस्थास्य ततदा स्यागोचरो भविष्यति। यत्तु नित्यमनुगतं तं भोक्ष्यति। तापत्र
ग्रु यपरीतं त्यक्ष्यत इति। सोयं नित्यानित्य[redacted]वस्तुविवेकः प्राग्भवीयादैहिकाद्वा कर्मणो विशुद्धसत्त्वस्य
क्तस्यैतदुपपत्तिभ्यां। न खलु सत्यं नाम नित्यं किंचिदस्तीति वाच्यं। तदभावे तस्य दृष्टीनस्यान्त तस्याप्यनुपपत्तेः। शू
न्यवादिनापि शून्यता या एव सत्यत्वात्। अथास्य पुरुषधौरेयस्यानुभवोपपत्तिभ्यां मे वं तु पुरा। नित्यस्य यतः नि
आचस्तत्य लोकात् आबावी चेजीयस्य क्षिप्रुतीति विपरिवर्तमानं क्षणमुहूर्तयामाहोरात्रार्द्धमासर्तुलायनवत्स मास
चतुर्जुग रयुगमन्वंतर प्रलयमहाप्रलयमहास्तगोवांत द्रसर्गसंस्कार सागरोर्मिभिरनिशमुह्यमानं तापत्रयपरीत
मात्मानं च जीवलोकं चावलोक्यास्मिन् संसारमंडले नित्यासुचि[redacted]दुरवात प्रसंख्यानमुपावर्ते कं
ते। ततोस्य घरा नित्यानित्यवस्तुविवेकलक्षणा। त्प्रसंख्यानादिहामुत्रार्थभोगो भवति। अर्थ्यते प्रार्थ्यत इ
सर्थः फलमिति यावत्। तस्मिन् विरागो नाम भोगासिको पेक्षाबुद्धिः। ततः शमस्मादिसाधनसंपत्। शमादिकाश्च २२
गवि २।

ष्ठितो वेदान् अनुसाधयतया समजानन्। अनिष्टाच्चैवम् नैष्कर्म्यमोक्षमिच्छन् व्रजत्यथवाऽस्तत आह यथा च हृदयपापं
वस्तु नानामानं तत्पर्यनियमः॥ कृतः। हृदयस्यापि अवघस्य पंजिह्वाया अथवक्ष्यसंस्कृत अथान्यद्वा ब्राह्मण्यान्नो स्याद्वि
वक्षितत्वात् न तत्र थेहकाम नियमो विवक्षितः। स्यात्तर्थे वानियमप्रदर्शी। नात्र। यदि वेतरथा ब्रह्मचर्यादेव प्र
व्रजेत् गृहाद्वा वनाद्वा इति। एतावता हि वैराग्यमुपलक्षयति। अत एव यदहरेव विरजेत् तदहरेव प्रव्रजे
दिति श्रुतिः। निंदावचनं चाविशुद्धस्य पुरुषस्य पि प्रापय। अविशुद्धस्य चोऽपि मोक्षमिच्छन्॥ आलस्यात्तु पापे
अप्रवर्त्तमानो गृहस्थधर्ममपि नित्यनैमित्तिकमनाचरन् जतिक्ष्णुराप्तुपचीयमानः। पाप्माचोगच्छतीति स
र्यः॥ स्यादेतत्त्रामान्त्र श्रौत आर्षी वा त्रैमः। पाठस्थानमुख्यप्रवृत्तिप्रमाणपकास्तुक स्मान्नप्रवर्तीत्यतआ
ह। शेषशेषित्वे प्रमाणानामावात वाचारसानामस्पृदादीनां शेषित्वं चाग्नेयादीनां एकफलवदुपकारोपनिबद्धानाम
वा फलावद्धिन्नानामेक प्रयोगवचनोपगृहीतानां एकाधिकारिकर्तृ[illegible]काणामेक पूर्णमासस्यमावास्याका
ल संबंधानां युगपदनुष्ठानाशक्तेः सामर्थ्यात्क्रमप्राप्तौ तद्विशेषापेक्षायां पाठादयः तद्देर नियमाय प्रभवंति। प
त्तुनशेषशेषि भावो नाप्यधिकाराववेद्यरूपस्यास्तेयोपध्येमराजाजापत्यादीनां तत्रेव मभेदापेक्षा भावान्न
पाठादिक्रमविशेषनियमे प्रमाणं। अवङ्गनीयत्तयातस्यत्त त्रा[illegible]गतत्वात्। नचेह धर्मब्रह्मजिज्ञासा
यो। शेषशेषि भावे श्रुत्यादीनामन्यतमप्रमाणमस्तीति। ननु शेषशेषिभावाभावेऽपि क्रमनियमो दृष्टो य
न यागो दार्शस्य प्रकृत्यार्थस्य यथा दर्शपौर्णमासिके रंगेः सह। यथा वा दर्शपौर्णमासाभ्यामिष्ट्वा सोमेन यजेतेति
दर्शपौर्णमासस्सोमयोः अशेषशेषिणोरपि स[illegible]त आह। अधिकृताधिकारे च प्रमाणाभावात् इति या जनः।

मत्स्यार्थी सशल्कान्सकंटकान्मत्स्यानुपादत्ते। स यावदादेयं तावदादाय विनिवर्त्तते। यथा धान्यार्थी सपलालानि दा१
धान्यान्याहरति स यावदादेयं तावदादाय विनिवर्त्तते। तस्माद्दुःखभयान्नानुकूलवेदनीयमैहिकं वामुष्मि
कं वा सुखं वा परित्यक्तुमुचितं। न हि मृगाः संतीति शालयो नोप्यंते न हि भिक्षुकाः संतीति स्थाल्यो नाधिश्रीयंते अ
पि च दृष्टसुखं चंदनवनितादिसंगजन्म क्षयितालक्षणेन दुःखेनाघ्रातत्वात्। अतिभीरुणा संत्यक्तुमपि न त्वा
मुष्मिकं स्वर्गादि तस्याविनाशित्वात्। श्रूयते हि अपाम सोमममृता अभूमेति। तथा चाक्षय्यं ह वै चातुर्मा
स्ययाजिनः सुकृतं भवति। न च कृतकत्वहेतुकं विनाशित्वानुमानमत्र संभवति। नरशिरःकपालशौचतानु
मानवदागमबाधितविषयत्वात्। तस्माद्यथोक्तसाधनसंपत्त्यभावात्। न ब्रह्मजिज्ञासेति प्राप्ते। एवं प्राप्ते आ
ह। भगवान्सूत्रकारः अत इति तस्यार्थं व्याचष्टे भाष्यकारः। यस्माद्वेद एवेति। अयमभिसंधिः। सत्संम्र
गभिक्षुकादयः शक्याः परिहर्तुं पाचककृषीवलादिभिः दुःखं तु अनेकविधानेककारणसंपातजम■
शक्यपरिहारमतः ततः साधनपारंपर्यं त्वक्षयितालक्षणयोर्दुःखयोः समस्तत्वात् तत्कासुखाविनाभावनियमा
त्। नहि मधुविषसंपृक्तमन्नं विषं परित्यज्य मधु भुंजते। सा कंपशिल्पिवरेणापि भोक्तुं। क्षयितानुमानोपोद्बलितं स११
च तद्यथेह कर्मजित इत्यादि वचनं ■क्षयिताप्रतिपादकं अपाम सोमम् इत्यादिकं वचनं मुख्यासंभवे जघन्यवृ स्व
त्तितामापादयति। यथाहुः पौराणिकाः। आभूतसंप्लवं स्थानममृतत्वं हि भाष्यते इति। अत्र च ब्रह्मपदेन तत्प
रामावेद उपस्थापितः स च योग्यत्वात् तद्यथेह कर्मजित् इत्यादि अत इति सर्वनाम्नापनाम्नश्च परहेतु पंचम्यानि २३
त

दृश्यते॥ स्यादेतत् । यथा स्वर्गादेः कृतकस्य सुखस्य दुःखानुषंगस्तथा ब्रह्मणोऽपीत्यत आह । तथा ब्रह्मज्ञा
नादपीति तत्तेनायमर्थः । यतः स्वर्गादीनां क्षयित्वं तत्प्रतिपादका... तो ब्रह्मज्ञानस्य च परमपुरुषार्थतां प्रतिपादकात्
आगमात् यथोक्तसाधनसंपत्तेः तत् ब्रह्मजिज्ञासेति सिद्धं ॥ ॥ ब्रह्मजिज्ञासापदव्याख्यानमाह । ब्रह्मण इति ष
ब्र ष्ठीसमासप्रदर्शनेन प्राचां वृत्तिकृतां ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासेति चतुर्थीसमासः परास्तो वेदितव्यः । तादर्थ्यस
मासे प्रकृतिविकृतिग्रहणं कर्तव्यमिति कात्यायनीयवचनेन तस्य पदार्थादिष्वेव प्रवृत्तिविकारभूतेषु चतुर्थी
समासनियमात् तत्र अप्रकृतिविकारभूतत्वे वमक्षीत्तन्निषेधाद् अश्वघासादयः षष्ठीसमासा न विध्यन्तीति न अश्वघा
सादिषु षष्ठीसमासप्रतिविधानात् षष्ठीसमासेऽपि च ब्रह्मणो वास्तवप्राधान्योपपत्तेः । स्यादेतत् ब्रह्मणो
जिज्ञासा तु क्तेन तत्र ज्ञाने कार्यत्वात् ब्रह्मशब्दस्य संशयः कस्येयं जिज्ञासेति । अस्ति ब्रह्मशब्दो विप्रजातौ यथा ब्राह्मणो ब्रह्मणोऽ
सू कमिति । अस्ति च परमात्मनि यथा ब्रह्मविद् ब्रह्मैव भवतीति तमिमं संशयमपाकरोति । ब्रह्म च वक्ष्यमाणलक्षणमि
ति यतो ब्रह्मजिज्ञासा प्रतिज्ञायते तत् ज्ञानाय परमात्मलक्षणं प्रणयति । ततो वर्णाश्रमाः परमात्मजिज्ञासैवेयं न वि
त्रि प्रत्वादिजातिजिज्ञासेत्यर्थः । षष्ठीसमासपरिग्रहेऽपि नेयं कर्मषष्ठी । किं तु शेषलक्षणा संबंधमात्रं च शेष इति ब्रह्म
णो जिज्ञासेत्युक्ते ब्रह्मसंबंधिनी जिज्ञासेत्युक्तं भवति । तथा च ब्रह्मस्वरूपप्रमाणयुक्तिसाधनप्रयोजनजिज्ञा
साः सर्वा ब्रह्मजिज्ञासया अवरुद्धा भवंति । साक्षात्तासां परंपरया ब्रह्मसंबंधात् । कर्मषष्ठ्यां तु ब्रह्मणः प्राधान्ये कर्मत्वं च
तत् स्वरूपमेवेति प्रमाणादयो नावरुध्येरन् । तथा चाप्रतिज्ञातार्थचिंता प्रमाणादिषु भवेदित्येवमन्यं ते तन्मन्यस्या ति
यथा ब्रह्म हसतीति कश्चिद्वेदे ८

ह ब्रह्मणः इति। कर्मणीति। अत्र हेतुमाह। जिज्ञास्यत्वादिति। इच्छायाः प्रतिपन्नसम्बन्धो ज्ञानं। ज्ञानस्य च ज्ञेयं ब्रह्मसर्गोनाख
ल्लु ज्ञानेनद्वे यं विना न निरूप्यते। न च जिज्ञासा ज्ञानेनैव[redacted]िति प्रतिपत्स्यनुबन्धा प्रथमं जिज्ञासा कर्मैवापेक्षते तेन तु संब
न्धिमात्रं तदनन्तरं सापेक्षत इति कर्मणो तन्निरूपणात्। नहि चन्द्रमसमादित्यं चोपलभ्य कस्यायमिति संबन्ध्यन्वेष
णं भवति भवति तु ज्ञानमित्युक्ते विषयान्वेषणं किंविषयमिति। तस्मात्प्रथममपेक्षितत्वात्कर्मत एव ब्रह्मसंबध्य
ते। न संबन्धितामात्रेणात्तस्य जघन्यत्वात्। तथा च कर्मणि षष्ठी स्यात्। ननु स्वं जिज्ञास्यमन्तरेण जिज्ञासा न नि
रूप्यत इति जिज्ञास्यान्तरं ब्रह्म भविष्यति ब्रह्म तु शेषतया संभंत्स्यत इत्यत आह। जिज्ञास्यान्तरेति। निगूढाभिप्रायश्चो
दयति। ननु शेषषष्ठीपरिग्रहेऽपीति। सामान्यसंबन्धस्य विशेषसंबन्धाविरोधेन कर्मतायाः अविघा[redacted]तेन जिज्ञा
सा निरूपणोपपत्तेरित्यर्थः। निगूढाभिप्रायमेवं दूषयति। एवमपि प्रत्यक्षं ब्रह्मणः इति। वाच्यस्य कर्मत्वस्य
जिज्ञासया प्रथममपेक्षितस्य त्यागेन मम संबन्धाहेतुकस्य चान्यपरित्यागेन प्रश्नात्कथंचिदपेक्षितस्य संबन्धिमा
त्रस्य संबन्धो जघन्यः प्रथमः। प्रथममप्रजं घन्यं इति सुव्याहृतं न्यायं मत्वा प्रत्यक्षपरोक्षत्वाभि[redacted]धानं च
स्फुटत्वा प्राधान्याप्राधान्यस्फुटत्वाभिप्रायं चोदकाभिप्रायमुद्घाटयति। न व्यर्थो ब्रह्माश्रितत्वशेषेति। व्याख्यातमेतदध
स्तात्। समाधातास्त्वभिसंधिमुद्घाटयति। न प्रधानपरिग्रह इति वास्तवप्राधान्यं ब्रह्मणः शेषसंनिदर्शन
अतिरोहितार्थः। श्रुत्यनुगमश्चातिरोहितः। तदेवमभिमतं समास्त्य व्यवस्थाप्य जिज्ञासापदार्थं समाह। ज्ञातुमिति।
स्यादेतत्। न ज्ञानमिच्छाविषयः सुखदुःखावाप्तिपरिहारौ वा तदुपायो वा तद्धारेण ज्ञानगोचरः। न चैवं ब्रह्मज्ञानं न
खल्वेतदनुकूलमिति प्राप्तिकूलनिवृत्तिरिति वानुभूयते। नापि तयोरुपायः तस्मिन्सत्यपि सुखभेदस्यादर्शना २४

यमादिराम् तेस्मिन्नसक्तेषु तेषु उच्चावचमिंद्रियाणि प्रवर्त्तंते द्विविधाश्च प्रवृत्तीः पुण्यपापरूपफलं भावयत्पुरु
ष भ्रामयति घोरे विविधदुःखज्वालाजटिले संसारहुतभुजि जुहोति प्रसंख्यानाभ्याससलब्धवैराग्यपरिपाक
भग्नरागादिकषायमदिराच मदं च मनः पुरुषेणावजीयते वशीक्रियते। सोयमस्य वैराग्यहेतुको मनोविजयः
यामइति वशीकारसंज्ञा इति चाख्यायते। विजितं च मनस्तत्तद्विषयविनियोगयोग्यतां नीयते सोयमस्य योग्यता
दमः। यथा दांतोयं वृषभः पुंवाहलशकटादिवहनयोग्यः कृत इति गम्यते। आदिग्रहणेन च विषयतितिक्षा तदुप
रमतत्त्वश्रद्धाः संगृह्यंते। अत एव श्रुतिः। तस्माच्छांतो दांत उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्य
त्सर्वमात्मानं पश्यतीति तदेवं तस्य शमदमादिरूपस्य साधनस्य संपत्प्रकर्षः। शमादिसाधनैः संपत। ततोस्य
संसारविवचना मुमुक्षा भवतीत्याह॥ मुमुक्षुत्वं च॥ ॥ तस्य च नित्यशुद्धबुद्धमुक्तस्वभावब्रह्मज्ञानमोक्षस्य काम
यमिस्तु पश्चात् जिज्ञासा भवति धर्मजिज्ञासायाः प्रागूर्ध्वं च तस्मात्तेषामेवानंतर्यं न धर्मजिज्ञासाया इत्याह। तदेति
ति॥ ॥ न केवलं जिज्ञासामात्रमपि तु ज्ञानमपीत्याह। ज्ञातुं चेति उपसंहरति। तस्मादिति॥ कामप्राप्तं। अतः शाब्द
व्याचष्टे। अतःशब्दो हेत्वर्थः। तमेवातःशब्दस्य हेतुरूपमर्थमाह। तस्मादिदमेवेति। अत्रैव परिचोद्यते॥
यथोक्तसाधनसंपत्त्यनंतरं ब्रह्मजिज्ञासा भवतीत्येवदनुपपन्ना इहामुत्रफलोपभोगस्यानुपपत्तेः। अनन्त दिरा
ल्वैरनीयं हि फलं भ्रष्टलक्षणत्वात्फलस्य। न चानुरागहेतावस्य वैराग्यं न वीतुमर्हतीति। दुःखानुषंग
दर्शनात्सुखेपि वैराग्यमिति चेत्। एतन्नो सुखानुषंगात् दुःखेप्यनुरागो न कस्माद्भवति। तस्मात्सुखमुपा
स्व दीयमानेदुःपरिहारे प्रयतितव्यं। अवर्जनीयतया दुःखमागतमपि परिहृत्य सुखमात्रं परिभोक्ष्यते। तद्यथा

तल्लब्धानुत्तमानंतस्य दुःखस्य चात्यंतनिवृत्तेर्न सूत्रकारश्च नाद्यपि हृ कर्मता ज्ञानस्यैतत आह भगवातिप
र्यंतमिति न केवलं ज्ञानेनेष्यते किंत्ववगतिः साक्षात्कारं कुर्वदवगतिपर्यंतं सत्वाद्यापादिच्छायाः कर्मक
स्त्वात्स्मृत विषयत्वादिच्छायास्तदुपायंपर्यंतं गोचरयतीच्छाविशेषणमनुभवत्वमवगतिपर्यंतं ज्ञाने किमे
तावतापीष्टं भवति नत्वप्येकस्तथापि विषयमवगतिपर्यंतमपि ज्ञानमिष्यते इत्यत आह ज्ञानेन हि प्रमाणे
नावगंतुमिष्टं ब्रह्म भवतु ब्रह्म तु विषयावगतिः एवमपि कथमिष्टं इत्यत आह ब्रह्मावगतिर्हि पुरुषार्थः कि
मस्य रूपः न किंतु निःश्रेयसं विगलितनिखिलदुःखानुषंगपरमानंदघनब्रह्मावगतिर्ब्रह्मणः स्वभाव इति
सेवतिः श्रेयसं पुरुषार्थ इति स्यादेतत् न ब्रह्मावगतिः पुरुषार्थः पुरुषव्यापारव्याप्यो हि पुरुषार्थः न चास्या
ब्रह्मस्वभावभूताया उत्पत्तिविकारसंस्कारप्राप्तयः संभवंति तथा सत्यानित्यत्वेन तत्स्वाभाव्यानुपपत्तेः न चोत्प
त्याद्यभावे व्यापारव्याप्यता तस्मान्न ब्रह्मावगतिः पुरुषार्थ इति अत आह निःशेषसंसारबीजाविद्याद्यन
र्थनिबर्हणात् सत्यं ब्रह्मावगतेर्ब्रह्मस्वभावेनोत्पत्त्यादयः संभवंति तथाप्यनिर्वचनीयानाद्यविद्यावशा
प्प न ब्रह्मस्वभावोपि पराधीनप्रकाशोपि प्रतिभानपि न प्रतिभातीव पराधीनप्रकाश इव देहेंद्रियादिभ्यो भिन्नो २
प्येभिन्न इवावभासते इति संसारबीजाविद्याद्यनर्थनिबर्हणात्प्रागप्राप्त इवैतस्मिन्नपि प्राप्त इव भवती

वा.प्र.
२५

तिपुरुषेणाभिमानत्वात्पुरुषार्थ इति फलं अविद्यादीत्यादिग्रहणेन तत्संस्कारो वरुध्यते अविद्यादिनिवृत्तिस्तू
पासनाकार्या दृतं क्षरणं त्रिभेदात्मा स्थाकारा इति द्रष्टव्यं उपसंहरति तस्मादुपास्तिज्ञानासितत्वमुक्तं स
रणेन मुमुक्षुणा न स्वल्पत्वात् ज्ञानं विनाशवासनविविधदुःखनिदानमविद्योच्छिद्यते न चात्र द्वेष्टव्यं तेन
विगलितानि विलक्षणः स्वानुभवेनेर्घ्यन ब्रह्मात्मता साक्षात्कारा विर्भावो जीवस्य तस्मादेन स्वधुन ब्रह्म
ता सिद्धता तस्याप्यौ ज्ञानमपेक्षितव्यं तत्रत्वं केवले भ्यो वेदान्तेभ्यो पितु ब्रह्ममीमांसोपकरणेभ्य इति दर्शि
तिभेन ब्रह्ममीमांसायां प्रवृत्त्यनेन न तु वेदान्तेषु तत्स्थ विवाक्षायांताबात त्रफलवदर्थावबोधपरतां स्वा
ध्यायाध्ययनविधेः सूत्रयता अथातो धर्मजिज्ञासेत्यनेनैव प्रवर्त्तितत्वात् तद्धर्मग्रहणस्य वेदार्थो
पलक्षणत्वेनाधर्मवत्ब्रह्मणोप्युपलक्षणस्य धापि च धर्ममीमांसा वहे दार्थमीमांसपात्र ह्ममीमांसा
व्याक्षेप्तुं शक्यात्तथापि प्राच्यामीमांसया न तद्धत्साध्यते नापि ब्रह्ममीमांसायां अध्यापनमात्रानन्तर्यमिति ब्र
ह्ममीमांसारम्भा पानित्या निरूप विवेकाद्यानंतर्यप्रदर्शनाय पचेदसूत्रमारम्भणीयमितिपर्यौन रुक्त्यं स्यादेत
देतदेतेन सूत्रेण ब्रह्मज्ञानेपत्त्यपापता मीमांसायाः प्रतिपाद्यत इत्युक्तं तदेतदमुक्तं विकल्प्यासहत्वा
दिति चोदयति तन्नु ननु ब्रह्मेति वेदान्तेभ्यो पौरुषेयतया स्वतःसिद्धप्रमाणभावेभ्यः प्रसिद्धमप्रसिद्धं वा राम.
२५

८ सर्व्वः ब्रह्ममीमांसायाः सर्व्वसंधीकृवेदस्तुतिनप्रतिक्रिया साकरत्वादिप्रतिपालनविदितं तंदर्थसंवंधस्सुखेवमोक्षे
स्यात्पूर्वं हि प्रसिद्धवेदान्तवाक्यसमुत्थेन निश्चयज्ञानेन विषयीकृततत्तो नन्विता सितत्वं नित्यादि
क्रियेकर्मण्यविशेषाधापितः साधनस्य साधनत्वत्यापाति प्रमाणान्यथाप्रसिद्धं वेदान्तेभ्यस्तु हि न तद्वे
दान्ताः प्रतिपादयन्तीति सर्वथा प्रसिद्धं नैव ब्रह्म जिज्ञासितुमर्हत्यभूते हि प्रियेऽभवनीयत्वान्न तु सर्वथा
न तु भूतपूर्वं निवेष्यमाणमपि शक्यं जिज्ञासितुं प्रमाणाभावात् शङ्कोहितस्य प्रमाणं वक्तव्यः त
ति द्यावदवस्थातिशास्त्रप्रमितिर्वादितिसचेन्नावबोधयन्तु नस्तस्य तत्रप्रमाणत्वे न च प्रमाणान्तरं ब्रह्मणि
प्रक्रमते तस्मादप्रसिद्धस्य ज्ञातुं शक्यत्वस्याप्यजिज्ञासनादप्रसिद्धस्येष्वाप्यात्रविषयत्वादृशको ज्ञा
नत्वाच्च न ब्रह्मजिज्ञास्यमिमामाशंकोयः परिहरति उच्यते अस्ति तावद्ब्रह्म नित्यमुद्दत्तुहमुक्तस्वभावमय
+ मग्रन्थोऽसीदिसस्यक्रमाजत्वमसीत्यन्ता स्वेदभ्यो क्रियत्वा बाध्यते ब्रह्म स्वरूपावगमस्तायद्वत्पात
तो विचाराद्धि नास्ति अत्र च ब्रह्मत्यादिनावगम्येन तद्विषयमवगमे लक्षयति तदस्तित्वस्य सति वि
मर्शविचारात्मागा निर्णया क्रियेति स्थापिता लक्षणो दुःखमयं क्लेयति प्रभुद्धेतिदेहाद्ध्यायाधिकम
पि दुःखमयाकारोतिबुद्धेत्यपराधीनप्रकाशमानंदमात्रदर्शयति आनंदप्रकाशैर्योरभेदात्तस्मादेत मतं
न्मुक्तोऽसत्यामस्येते शुद्धत्वादयः प्रथंतेतनन्तत्प्राग्देहाद्यभेदेन तद्ब्रह्म जन्ममरणादिदुःखयोगा

वाक्य.प्र०

२९ द्दित्यतः कंमुक्तेतिसदेवमुक्तः सदेव केवलो नाद्यविद्यावशानुस्यात्तथावभासते इत्यर्थः तदेव मनोपाधिकं
ब्रह्मणो रूपं दर्शयित्वा आविद्योपाधिकं रूपमाह सर्वज्ञं सर्वशक्तिसमन्वितं तत इन्नेनजगत्कारणत्वमस्य
सिद्धं शक्तिज्ञानभावाभावावनुविधानात् कारणताभावाभावयोः कुतः पुनः एवंभूतब्रह्मरूपावगतिरि
त्यत आह ब्रह्मशब्दस्य हीति निर्वचनं सदेव सोम्येदमित्यादीनां वाक्यानां पौर्वापर्यालोचनपेक्षं भूतब्रह्मा
वगतिः अपि तु ब्रह्मपदस्यापि निर्वचनसामर्थ्यादिदमेवार्थस्वरूपं प्रतिपत्तिनिर्वचनमाह बृहत्त्वेधातोरर्थानु
रति गमात् द्वृहिकमेवं बृंहति बृंहयनेव नित्यं ततेऽस्य निपातमनवच्छिन्नं पदार्थान्तरं बृंहगत नित्यमुक्तं बुद्धं त्वाच
स्याप्यनु जानातीत्यर्थः तदेवं तत्पदार्थं स्वरूपमुक्त्वा रेः प्रसिद्धिमभिधाय त्वंपदार्थस्याप्याह सर्वस्या
त्मत्वाच्च ब्रह्मणस्तित्वप्रसिद्धिः सर्वस्याप्यनुलयात्स्य हौलिकस्यापि प्रत्यगात्मत्वप्रसिद्धिः कुतः आत्मत्वा
त्ततदेवस्फुटयति सदेवो हीति प्रतीतिमेवाप्रतीतिनिरासेन द्रढयति नेनेतिनन प्रत्येत्यहमस्मीति किंतु
प्रत्येत्येवेति योजना नन्वहमस्मीति चेन्नास्य तिमाच तासीदात्मा न मित्यत आह यदीति अहमस्मीति न प्र
तीयात् अहंकारास्पदं जीवात्मानं चेत्प्रतीयादहमिति न प्रतीयादित्यर्थः ननु प्रत्येतु सर्वो जन आत्मा
नमहंकारास्पदं ब्रह्मत्वेनानुविमामाते मित्यत आह आत्मा च ब्रह्मेत्यादरत्वमात्मा मानो विकरणापादसा रम०
२९

त्तत्पदार्थस्यशुद्धबुद्धत्वादेः शब्दगतत्वंपदार्थस्य चजीवात्मनः प्रत्यक्षतः प्रसिद्धेः पदार्थज्ञानपूर्वक
त्वाद्वाक्यार्थज्ञानस्य त्वंपदार्थस्य ब्रह्मभावावगमस्तत्त्वमसीति वाक्यादुपपद्यत इति भावः आक्षिप्तप्रथ
कस्याश्रयं देहोपमाहयदि तर्हि लोके इति अध्यापकाध्येतृपरंपरालोकः तत्रात्तत्त्वमसीति वाक्याद्यदि ब्रह्मात्म
त्वेन प्रसिद्धमस्ति श्रोत्राब्रह्मत्वेनेति वक्तव्ये ब्रह्मात्मत्वेनाप्रमेयविवक्षयागमपितद्वयं परिहरति नकुत
स्तद्विशेषं प्रति विप्रतिपत्तेः नेदनेन विप्रतिपत्तिः साधकबाधकप्रमाणाभावे सति संशयबीजमुक्तं तत्र
स्वसंशयाज्जिज्ञासोपपद्यत इति भावः विवादाधिकरणधर्मी सर्वतंत्रसिद्धोऽभ्युपेयः अन्यथान्यतराश्र
याभिन्नाश्रयावा विप्रतिपत्तयोनस्युः विरुद्धाहि प्रतिपत्तयो विप्रतिपत्तयः नेचानाश्रयाः प्रतिपत्तयो भवंति
अनालंबनतापत्तेर्नचभिन्नाश्रया विरुद्धा नह्यनित्याबुद्धिर्नित्य आत्मेति प्रतिपत्ती विप्रतिपत्ती तस्मात्त
त्पदार्थस्य शुद्धबुद्धत्वादेर्वेदांतेभ्यः प्रतीतेस्त्वंपदार्थस्य चजीवात्मनो लोकतः सिद्धेः सर्वतंत्रसिद्धांतः
तदाभाससत्वानाभासत्वेन तद्विशेषेषु परमतं विप्रतिपत्तयः तस्मात्तदाभासत्वतः प्रसिद्धेर्धर्मिणो विशेष
णोविप्रतिपत्तेर्युक्तस्तद्विशेषेषु संशयः तत्रत्वंपदार्थेतावद्विप्रतिपत्तीर्दर्शयति देहमात्रमपि स्वात्माहिता
भोजैवकेवलेनेकजैनमतेन अत्र देहेंद्रियमनः स्तासीक विज्ञानचैतन्यपक्षेन तत्पदार्थेनिरूपवारयेत्वं

पदार्थेन संबंध्यं तेयोग्यताविरहात्त्वंपदस्यापि सर्वोपाख्यारहितमपदार्थः कथं तत्त्वमोर्गोचरः कल्पितभोक्तृत्व
भावस्यापि यदि शामितयात तत्पदार्थो नित्यत्वाद्यसंगतिरेवमकर्तृत्वेपि भोक्तृत्वपक्षेपि रिशामितया नित्य
त्वाद्यसंगतिः अभोक्तृत्वेपि नानात्वे नावच्छिन्नत्वात् नित्यत्वादिप्रसक्तावद्वैतहानात्त्वं तत्पदार्थासंगति
स्तदवस्थैव त्वंपदार्थे विप्रतिपत्त्या च तत्पदार्थे विप्रतिपत्तिर्द्रष्टव्या शीतांशुहास्यामाप्यवादिनो हि लोकायति
कादयः तत्पदार्थं प्रत्ययं मिथ्येति मन्यंते वेदस्याप्रामाण्यवादिनो प्यौपचारिकं तत्पदार्थं माविर्वालितं वाम
तेन तदेव त्वंपदार्थे विप्रतिपत्तिद्वारा तत्पदार्थे विप्रतिपत्तिं सूचयित्वा साक्षात्तत्पदार्थे विप्रतिपत्तिमाह श्राति
न घातिरिक्त ईश्वरः सर्वज्ञः सर्वशक्तिरिति केचित् तदितिजीवात्मनः परात्मा इति न केवलं शरीरादिभ्यो
जीवात्मभ्योपि व्यतिरिक्तः सर्वस्य सर्वस्य जगतः ईष्टे सैश्वर्यपासिद्ध्यर्थं भाविकमस्य स्वरूपमद्वपमुक्तं सर्वं स्वा
ज्ञः सर्वशक्तिरिति अस्यापि जीवात्मभ्यो व्यतिरेकात्तत्त्वंपदार्थेन सामानाधिकरण्यमिति स्वमतमाह
त्मा स भोक्तेत्यपरे भोक्तुर्जीवात्मनो विद्योपाधिकस्य सर्वेश्वरस्तत्पदार्थ आत्मा न तत ईश्वराद्भिन्नो
जीवात्मा परमात्मा काशादिवद्घटाकाशाद्यपरत्वथः विप्रतिपत्तीरुपसंहरन् विप्रतिपत्तिबीजमाह एवं बहव इ
ति युक्तियुक्ताभासवाक्यवाक्याभाससमाश्रयाः इति योजना ननु संत्वविप्रतिपन्नयस्तन्निमित्तेष्वसंशय

पस्तथापि कथं ब्रह्ममीमांसारभ्यत इत्यत आह तत्त्वाविचार्येति तत्त्वज्ञानान्निःश्रेयसाधिगमो नातत्त्वज्ञा
नोद्भवितुमर्हतीति अपि चातत्त्वज्ञानान्नास्तिक्ये सत्यनर्थप्राप्तिरित्यर्थः सूत्रतात्पर्यमुपसंहरति तस्माद्धिते
विहितमीमांसा तावत्कृतैव तदविरोधिनश्चान्ये प्रतिपादिता अधरमीमांसायां न्याये च वेदप्रामाण्यस्यादि प्र
माणप्रयत्नशोधनादिषु तद्रूपकरणपक्षाः सा तथोक्ता तस्मात्परमनिःश्रेयससाधनब्रह्मज्ञानप्रयोज
ना ब्रह्ममीमांसारब्धव्येति तदेवं प्रथमसूत्रेण ब्रह्ममीमांसारंभमुपपाद्य अस्या मीमांसा आरंभते तत्राद्य
स्य पूर्वः तस्य सूत्रस्येति निक्षा माह भाष्यकारो ब्रह्मजिज्ञासितव्यमित्युक्तं किंलक्षणं पुनस्तद्ब्रह्म अ
त्र यद्यपि ब्रह्मस्वरूपतत्त्वस्य प्रधानस्य प्रतिज्ञा यो तदङ्गस्यापि प्रमाणादेर्निरूपति ज्ञाता तथापि स्व
रूपस्य प्राधान्यात्तदेवादित्यप्रथमं समर्थितेति अथ यद्याव दनुभूयते तत्स्वयं परिमितमविस्तृतमवृह
द्विधांसिनतेनोपलब्धव्यचरेसातद्धि रूपस्य नित्यशुद्धबुद्धमुक्तस्वभावस्य ब्रह्मणः स्वरूपं शक्यपलेक्षप
मुंतहि जातु कश्चित्ज्ञिन तत्कत्वेनेति यत्वं लक्ष्यते इति सत्यादिना तद्धर्मस्य ते तस्यानुपल
ब्धचरत्वात प्रसिद्धं हि लक्षणं भवति नान्यतः प्रसिद्धं सर्वं वनशब्दोप्यत्र प्रक्रमनेन अत्यन्ताप्रसिद्धं तथा
ब्रह्मणो पदार्थस्यावाक्यार्थत्वात् तस्मात्लक्षणमात्रान्न ब्रह्म जिज्ञासितव्यमित्यस्ये पाभिप्रायः

वा॰ प्र॰ तामिममाक्षेपं भगवान्सूत्रकारः परिहरति जन्माद्यस्य यत इति माभूदनुभूयमानं जगद्ब्रह्मधर्मतया तादा
२८ त्म्येन वा ब्रह्मलक्षणं तटस्थं त्वस्य भविष्यति देशान्तरप्राप्तिरिव सवितुर्व्रज्याया इति नात्यर्थः सूत्रावय
वान्विभजते जन्मोत्पत्तिरादिरस्येति नाद्यवापसूत्रकृता जन्मादीति नपुंसकप्रयोगः कृतः तद्रूपपादना
पसमाहारमाह जन्मस्थितिभङ्गमिति जन्मनश्चेत्यादि कारणानिर्देश इत्यतः संरम्भोऽतिगरुव्याख्यातः
स्यादेतत्प्रधानकालग्रहलोकपालक्रियायदृच्छास्वभावाभावेषूपप्लवमानेषु सत्सु सर्वज्ञसर्वशक्ति
स्वभावं ब्रह्म जगज्जन्मादिकारणमिति कुतः संभावनेत्यत आह अस्य जगत इति अस्य नामरूपाभ्यां
व्याकृतस्येति अचेतनस्वभावकार्यत्वसंभावनया प्रधानाद्यचेतनकार्यत्वं च निरूपाख्यकार्यत्वं च व्यासे
धति पञ्च तु वस्तु तु नाम्ना रूपेण च व्याक्रियते तच्चैतनकर्तृकं दृष्टं यथा घटादि विवादाध्यासितं च जग
न्नामरूपव्याकृतं तस्माच्चेतनकर्तृकं संभाव्यते चेतनो हि बुद्धावालिख्य नामरूपे घट इति नाम्ना रूपे
ण चैवं च कम्बुग्रीवादिना बाह्यं घटं निष्पादयति अत एव घटस्य निर्वर्त्यस्याप्यन्तः संकल्पात्मना सिद्धस्य कर्म
कारकभावो घटं करोतीति यथाहुः बुद्धिसिद्धं तु तदसदिति तथा चाचेतनो बुद्धावनालिखितं करोतीति न नन
शक्यं संभावयितुमिति भावः स्यादेतत् चेतना ग्रहा लोकपाला वा नामरूपे बुद्धावालिख्य जगज्जनयिष्यं राम॰

२८

तिकृतमुक्तस्वभावेनग्रहणेत्यत आहानेककर्तृत्वभोक्तृसंयुक्तस्येति केचित्तु कर्त्तारो भवंति यथा त्विगादि
योऽभोक्तारः केचित्तु भोक्तारो यथा श्राद्धे वैश्वानरीयेष्ट्यादिषु पितृपुत्रादयो नकर्त्तारः तस्माद्भयग्रहणं
देशकालनिमित्तक्रियाफलानीतीतरेतरद्वंद्वः देशादीनि च तानि प्रतिनियतानि चेति विग्रहः तत्राप्र
जगत नस्य केचित्तु प्रतिनियतदेशो यथाहाः पुष्करादम्लगादयः केचित्तु प्रतिनियतकालो यथाहाः यथा
कोकिलास्यः केचित्प्रतिनियतनिमित्ताः यथा नवांबुवृष्ट्यानादिनिमित्ता बलाकागर्भाधानः केचित्प्रति
नियतक्रियापथाश्राह्मणानां पाजनादयो नेतरेषां सर्वे प्रतिनियतफला यथा केचित्सुखिनः केचिद्दुःखिन
सर्वं यस्य वसुखिनस्तस्य दुःखिनः सर्वमेतदेकस्मिकायरन्नाप्रियाद्धेच्छिकत्वे तु स्वाभाविकत्वे वा सर्वज्ञ
सर्वशक्तिकर्तृत्वे च न घटते परिमितज्ञानशक्तिभिस्तु रलोकपालादिभिः तन्निर्वुकर्त्तृत्वाशक्यत्वात् दिद
मुकं मनसाप्यचिंत्यरचनारूपस्येति एकस्य अपि हि शरीररचनापा रूपं मनसा न शक्यं चिंत
यितुं किं हा चिलिंगे वजगद्रचनायाः किं भंगपुनः कर्त्तुमित्यर्थः सृत्रुवाकोपपद्यते तद्धस्तातिवाक्यशेषः स्या
देततत्कस्मात्तु नाश्चितिभंगमात्रमिहाभिहितं ग्रहणे न गत्वा तेन तु यद्दृष्टं परिणामो पुत्रपाश्रयीत्यत
आहानेषामपि भावविकाराणां वृद्ध्यादीनां त्रिषेवां तभाव रतितिवृद्धेस्तावद्वयापामोपचयः तेनात्मा व

वा.प्र॰

३८

यवाद्यवयविनोद्दितं तु काद्देरस्य एवमहापवीनापते इति जन्मैव वृद्धिः परिणामोपि त्रिविधो धर्मलक्षणावस्था
लक्षणा उत्पत्तिरेव धर्मिणो हि हाटकादेर्धर्मलक्षणः परिणामः कटकमुकुटादिस्तस्योत्पत्तिरेव कट
कादेरपि प्रत्युत्पन्नत्वादिलक्षणः परिणाम उत्पत्तिरेवमवस्थापरिणामो नवपुराणत्वादिरुत्पत्तिः अ
पक्षयस्त्ववयवक्षयो नाश एव तस्माज्जन्मादिषु यथास्वमन्तर्भावात्षड्भावाद्यः पृथङ्नोक्ताः यद्यपि
अथैते षड्भावमोन जन्मादिष्वंतर्भवंति तथाप्युत्पत्तिस्थितिभंगं यावादात व्याप्त घासति हि तत्रापि या मेरो
द्केयतो वाइमा निरूपभूता नोति वेदवाक्ये बुद्धिस्थीकृते जगन्मूलकारणब्रह्मलक्षितं भवति अन
थात्र जायते अस्ति वर्द्धते इत्यादीनां ग्रहणे तत्पतियाद्कं निरुक्तवाक्यं बुद्धौ भवेत्तत एव न मूलकारणप्र
तिपादनपरं महासर्गादौ ध्रुवस्थितिकालेपि तद्वाक्योदितानां जन्मादीनां भावविकाराणामुपपत्ते
क्रोसकि रिति शंकानिराकरणार्थं वेदोक्तस्थि तिभंगग्रहणमित्याहुः यास्कपरिपठितानामिति तन्त्वेवमप्युप
त्तिमात्रं सूच्यतां तत्रात शीघ्रकतया तु स्थितिभंगं गम्यते इत्यत आह यात्सत्पत्तिमात्रं लक्षणकाबीकरणम् +२
~~विशेषणानामप्रयोजनमाद्यथोक्ते नित्र दे नेन प्रवेश तस्मानि ताविषय स्यात्त लक्षणस्…~~
+ रणादिति त्रिभिरप्युपादानत्वं सूच्यते उत्पत्तिमात्रं तु निमित्तकारणसाधारणमिति नोपादान राम॰

१८

कार्य्यकारणविशेषणत्वान्प्रयोजनमाह नयपोक्तेति । तदनेनप्रबंधेन प्रतिदाविषयस्य ब्रह्मस्वरूपस्य १

सूत्रयेतत आदिसमुक्ते तत्रैवेदविषयौपक्रानांस्मरणद्वारेण संभावानोक्ता तत्रप्रमाणेवक्तव्यंपथाहुर्नै
र्थापिकाः संभावितंप्रतिज्ञापंचस्तः सोध्येतं हेतुनानतस्यहेतुभिरुद्धारणमुत्संतेनेचपोहृत यथा वंध्याजननीत्यादि
रितितत्वंनामजन्मादिसंभावनाहेतुंपदन्यैवैशेषिकादयइत्सवानुमांदीश्वरविनिश्चयमिच्छंतीतिसंभाव ना
नाहेतुनांदृष्टपितुमाहेतदेवेतिचोदयतितन्निहायीतिसत्तावतेवाधिकरणार्थेसमाप्रेवस्यमारणाधिकरणा
र्थेवदनसुहृडावेनपरीहरतिनेतिवेदांतवाक्यकुसुमयंघनार्थेनामेवदर्शीयतिवेदांतेतिविचारस्याप्य
वसानंसवासनाविद्याद्वयोच्छेदः ततोहिब्रह्मावगतेर्मैदेत्रिगणविभावः तात्किंप्रमाणीशब्दादेतेनमानांतरमनु
सरणीयं तथाचकुतोमननं कुतस्तदनुभवे तिनहसृकुनाताीतिप्रतिषेधः तदनुरितयोर्विधीस्येवंना
ताधिस्पर्शनंनिषेधो ब्रह्मस्पृष्टद्वारेणविधिरित्येवंजातीयकाविधिप्रतिषेधाश्रयवेतनुत्तेतादृस्यतेना
हविकल्पोनागोपवादशब्दोहितोपसंसाहूरुसाम्राहृणायोरुदितानुरितहोमयोः स्वविरोधान्समुच्चयासंभ
वेतुल्यबलत्वपाचबाध्यबाधकभावाऽभेदेसमन्मानाविकल्पंनारास्थिस्पर्शनानिषेधनद्वारेणयोर्न
विरुद्धयोस्तुल्यबलत्वायानविकल्पांकि नास्यप्रकारइत्यत आह स्यतुवेदांतवाक्येष्वितिअनुमानवेदां
नाविरोधिनरूपस्तीविचेम पिद्धृष्व्यशब्दाविरोधिन्यानदृयजीविमाचयुज्ञाविवेचनंसमननंयुक्तिश्चाथो

श्रीराम
बा॰भा॰ २. यत्तिरनुमानैर्व स्यादेतद्यथा धर्मे न पुरुषबुद्धिसाहाय्यमेवं ब्रह्मण्यपि कस्मान्न भवतीत्यत आह न धर्मेति धर्मजि
ज्ञासायामिवेति श्रुत्यादय इति श्रुतीतिहासपुराणस्मृतयः प्रमाणं अनुभवोऽन्तःकरणवृत्तिभेदो ब्रह्मसाक्षा
त्कारस्तस्याविद्यानिवृत्तिद्वारेण ब्रह्मस्वरूपाविर्भावः प्रमाणफलं तच्च फलमिव फलमिति गमयितव्यं
यद्यपि धर्मजिज्ञासायामपि सामग्र्यां प्रत्यक्षादीनां व्यापारस्तथापि साक्षान्नास्ति ब्रह्मजिज्ञासायां तु सा
क्षादनुभवादीनां संभवोऽनुभवार्था च ब्रह्मजिज्ञासेत्याह अनुभवावसानत्वात् ब्रह्मानुभवो ब्रह्मसा
क्षात्कारः परः पुरुषार्थो निर्मृष्टनिखिलदुःखपरमानन्दरूपत्वादिति ननु भवतु ब्रह्मानुभवार्थी जिज्ञा
सा तदनुभवस्य त्वशक्योऽब्रह्मणस्त्वद्विषयत्वाद्योग्यत्वादित्यत आह भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्य
रूप व्यतिरेकसाक्षात्कारस्य विकल्पविषयविषयिभावः नत्वेवं धर्मज्ञानमनुभवावसानं तदनुभवस्य स्वयम
पुरुषार्थत्वात्तदनुष्ठानसाध्यत्वात्पुरुषार्थस्यानुष्ठानस्य च विनाप्यनुभवं शाब्दज्ञानमात्रादेव सिद्धेरि
त्याह कर्त्तव्ये हीत्यादिना चापरसाक्षात्कारविषयतायोग्योऽप्यवर्त्तमानत्वादवर्त्तमानश्चानवस्थितत्वादित्या
ह पुरुषाधीनेति पुरुषाधीनत्वमेव लौकिकवैदिककार्याणामाह कर्तुमिति लौकिकं कार्यमनवस्थि
तमुदाहरति यथाश्वेनेति लौकिकेनैवोदाहरणेन सह वैदिकमुदाहरणं समुच्चिनोति तथातिरात्र इ राम
२.

तिकर्तुमकर्तुमस्योदमुदाहरणमुक्तं कर्तुमन्यथा वा इति कर्तुमित्यस्योदाहरणमाह उदित इति स्वा
ई तत्पुरुषस्वातन्त्र्यात्कर्त्तव्ये विधिप्रतिषेधानामानर्थक्यं आत्तदधीनत्वात्पुरुषप्रवृत्तेरित्यत आह विधिप्रति
षेधाश्चार्थवन्तः स्युर्ग्रहणातीति विकल्पशास्त्रस्य स्पर्शेन निषेधस्य धारणाविषयेण विशेषणेनाबाधः
नतुक्तं भवति विधिप्रतिषेधैरेव स्वतनाविधेयो निषेध्यः दर्शो विषयो नागतोत्साह्यरूप उपनीतो येन पुरुषस्य
विधिनिषेधाधीनप्रवृत्तिनिवृत्तेरपि स्यात्तन्त्रं भवतीति भूतवस्तुनि तु नेयमस्तीत्याह नतु वस्त्वेवं नैव
मितितदनेन प्रकारविकल्पो निरस्तः प्रकारे विकल्पं निषेधति अस्ति नास्तीति स्यादेतत् भूतेऽपि वस्तुनि
विकल्पो दृष्टः यथा स्थाणुर्वा पुरुषो वेति तत्कथं वस्तु न विकल्प्यत इत्यत आह विकल्पनास्त्विति पुरुषबुद्धि
स्तच्छ्रणान्तरस्येसा विकल्पनाः संशयविपर्यासाः सवासनमनोमात्रयोनयो वा यथास्वप्ने सवासनेन्द्रि
यमनोयोनयो वा यथा स्थाणुर्वा पुरुषो वेति स्थाणौ संशयः पुरुष एवेति वा विपर्यासो न पुरुषतत्त्वस्थाणु
तत्त्वे वा येह्लातेषु मानधर्मधर्मिमात्राधीनत्वं न्यात्वान्नतस्माद्यथावस्तुत्वाद्विकल्पनानवस्तु विकल्पयति
वान्यथयन्ति वेत्यर्थः न तु ज्ञानं तु न बुद्धितन्त्रं किं तु वस्तुतन्त्रं अत एव तत्तो वस्तुनि विषयो युक्तो न तु विकल्पना
म्यदित्याह न वस्तुयाथात्म्यमित्येवमुक्तेन प्रकारेण भूतवस्तुविषयाणां ज्ञानानां प्रामाण्यं वस्तुतन्त्रं तत्राम

वा·प्र·

३९ थ्यत्र ब्रह्मज्ञानस्य वस्तुतंत्रतामाह तत्रैवं सतीति अत्र चोदयति ननु भूतेपि पक्तिलभूतार्थवाक्येन प्रमाणांतरगो
चरार्थेन यानुवादकं दृष्टं यथा नद्यास्तीरे फलानि संतीति तथा च वेदांतास्तस्माद्भूतार्थेन यथा प्रमाणांतरदृष्ट
मेवार्थमनुवदेयुः उक्तं च ब्रह्मणि लिंगाभावान्नादिहेतुकमनुमानांतरं प्रमाणं एवं च मौलिकं यत्प्रमाणं तद्देवप
रीक्षणीयं न तु वेदांतवाक्यानि निरर्थीनसमत्वानीति कथं वेदांतवाक्यग्रथनार्थता सूत्राणामित्यर्थः यदि
दूरनिंद्रियाविषयत्वइति कस्मात्पुनर्नेंद्रियविषयत्वं श्रुतौ चइत्यत आह स्वभावतइति अत एव वक्ष्यति यदि
चिरवानिर्व्यत्दशात त्स्वपं भूतस्मात्प्रत्यग्रान्यष्टं पतितानरात्मन्निति प्रापणात्मेन तत्त्वविषयं त्व मुपपादितं यथा च
सामान्यतो दृष्टमप्यनुमानं ब्रह्मणि न प्रवर्त्तनेन तथोपरिष्टात्रिपुणातर मुपपादयिष्यामः उपपादितं चेद
स्माभिर्विस्तरेण न्यायकणिकायां न च भूतार्थमात्रेणानुवादत्वं परिष्टादुपपादयिष्यामः तस्मात्तद्वेम
हातेश्च तिर्यग्नोवेति जन्मदर्शयति येन जाता निर्जीवंनेच्छितं यत्प्रयंतीतित्रैव प्रलयं त्र त्र च प्रधानादि संश
रज्जुव यतिर्णयवाक्यं आनंदाध्येवेति एतदुक्तं भवति यथा ज्ञानसहितरज्जुपादाना धारारज्ज्वासत्तामेवास्तिरज्जा
मेव चलीयते एवमविद्यासहितब्रह्मोपादानं जगद्ब्रह्मण्येवास्ति तत्रैव चलीयत इति ॥ छ ॥ सूत्रांतर
मवतारयन्नूपूर्वं सूत्रसंगतिमाह जगत्कारणत्वप्रदर्शनेनेति शास्त्रयोनित्वात् न केवलं जगद्योनित्वादस्य राम· ३९
जीवं तीति·

भगवतः सर्वज्ञता शास्त्रयोनित्वादपि बोद्धव्या शास्त्रयोनित्वस्य सर्वज्ञत्वसाधनत्वं समर्थयते महत ऋग्वे
यथा दादेः शास्त्रस्येति चातुर्वर्ण्यस्य चातुराश्रम्यस्य यथायथं निषेकादिश्मशानान्तासु क्रियासु समुद्धृतौ पक्रमप्रयोग
परिसमापनीयासु नित्यनैमित्तिककाम्यकर्मसु तिसृषु च ब्रह्मतत्त्वे चाशिष्याणां शासनाच्छास्त्रं ऋग्वेदा
दि अत एव महाविषयत्वात् सहस्रकेवलं महाविषयत्वेनास्य महत्त्वमपि तु अनेकाङ्गोपाङ्गोपकरणतयापी
त्याह अनेकविद्यास्थानोपबृंहितस्येति पुराणन्यायमीमांसादयो दश विद्यास्थानानि तैस्तया तया द्वारोप
कृतस्य तदनेन समस्तशिष्टजनपरिग्रहेण प्रामाण्यमपरं काव्यमाह ता पुराणादिप्रणेतारो हि महर्षयः शि
ष्टास्तैस्तया तया द्वारा वेदान् व्याचक्षाणैस्तदर्थं चादरेणानुतिष्ठद्भिः परिगृहीतो वेद इति न चायमनवबोध
कोनाप्यस्पष्टबोधको येन न प्रमाणं स्यादित्याह प्रदीपवत्सर्वार्थावद्योतिन इति सर्वमर्थजातं सर्वदा वबोधय
न्ननवबोधकोनाप्यस्पष्टबोधक इत्यर्थः अत एव सर्वज्ञकल्पस्य सर्वज्ञसदृशस्य सर्वज्ञस्य हि ज्ञानं
सर्वविषयं शास्त्रस्याप्यभिधानं सर्वविषयमिति सादृश्यं तदेवमन्वयमुक्त्वा व्यतिरेकमाह न हीदृशस्ये
ति सर्वज्ञस्य गुणः सर्वविषयता तद्वत्वितं शास्त्रं ~~[illegible]~~म । स्यापि सर्वविषयत्वात् उक्तमर्थं प्रमाणय
ति यद्यद्विस्तरार्थं शास्त्रं यस्मात् पुरुषविशेषात् संभवति स पुरुषविशेषस्ततोऽपि शास्त्राद् अधिकतरविज्ञानः

वी.प्र०

३२ तिप्रोजनाश्च घत्वेप्यस्मदादिभिर्येन्नस्मीचीर्थविषयं शास्त्रं विरच्यते नेतत्रास्माकं बन्कुर्गणां काव्यानां नमधि
कविषयं तन्हि नेतेश्च साधारणधर्मोऽनुभूयमानोऽपि शक्याव कुं न खल्वि क्षुक्षीरगुडादीनां मधुरभे
दाः शक्या सरस्वत्याप्याख्यातुं विस्तरार्थं क्षममपि वाक्यं नवक्तं तानेन तुल्यविषयमिति कथयितुं विस्तरग्रह
णां सोयनं पतिगमनं माहात्मिकि मुपक्रम्यामि तिवेदस्य यस्मान्महतोद्योतः संभवस्तस्य महत्त्वो भूतस्य श्च सूत्रा
निर्गतित्वात्सर्वज्ञत्वं सर्वशक्तित्वं च किमु वक्तव्यमिति प्रोजनाश्च त्वचाने कशः खामि नः स्वेतादि संभव
त्वात्तउपनयः तस्येतादिः सर्वशक्तित्वं चेत्पततिगमने श्रुप्रयत्नेनैवेतिरेवमप्रयत्नेन यथाऽलवणा
यवाम्पूरितिदेवर्षयो हि महोपरिश्रमेणापि यत्राशक्तास्तदयमीषत्प्रयत्नेनलीलयैव करोतीति निरतिश
यमस्यसर्वज्ञत्वं सर्वशक्तित्वं चेत्फलं भवति अप्रयत्नेनास्य वेदकर्तृत्वे श्रुतिरुक्ता अस्य महतो भूतस्येति
येपि तावद्वर्णानानित्यत्वमास्थिषत तेरप्येयद्वाक्यानामनित्यत्वमभ्युपेयं आनुपूर्व्यवितो हि वर्णाः प
दे यदाति वानुपूर्वी भिद्यते वाक्यान्तिकधर्मेश्चानुपूर्वीनव र्णधर्मः वर्णानां नित्यानां विभूनां च देशतः का
लतो वा पोवीपर्यायोगात्व्यक्तिश्चानित्येति कथं तद्रूपगृहीतानां वर्णानां नित्यानामपि युद्ताति नित्याप
द्यतिप्यतमाचवाक्यानामपि नित्यताव्याख्याता तस्मान्नतानुकरणवत्पदाद्यनुकरणप्रथाहियाद राम०

३२

गात्रचलनादिनैकः करोति तादृशमेव शिष्योऽप्यमुमनुकरोति नन्वेवं कीनमुत देवयन न्निरेवं यादृशीमा
नुपूर्वीं वैदिकानां यदृच्छया करोत्यध्यापयिता तादृशीमेवानुकरोति माणवको नन्तु तामेवोच्चारयति आ
चार्ययुक्तिभ्यो मा गणकं बध्यस्की नामस्मृत्वा तत्वेन स्मात्रिसाति सर्वादिनानलौकिकवैदिकपदवाक्यादिपौ वर्ण
रुषेयत्वे विवादः केवलं वेदवाक्येषु पुरुषस्वातन्त्र्यास्वातन्त्र्ये विप्रतिपत्तिः यथाहुः यत्नतः प्रतिषेध्या नः पुरु
षाणां स्वतन्त्रता तत्र सृष्टिप्रलयमनिच्छन्तो जैमिनीया वेदाध्यापनपरम्परात्वादृशगुरुशिष्यपरंपरामवि
च्छिन्नामनादिमाचक्षते वैयासिकं तु मतमनुवर्तमानाः श्रीतिहासादिसिद्धस्सृष्टिप्रलयानुसारेणानाद्य
विद्योपधानलब्धसर्वशक्तिज्ञानस्यापि परमात्मनो नित्यस्य वेदानां पौनरपि तेषु न स्वातन्त्र्यं पूर्वपूर्वसर्गा
नुसारेण तादृशतादृशानुपूर्वीविरचनात् यथा हि पापादि ब्रह्महत्यादिरूपोऽनर्थहेतवो ब्रह्मविचेतोऽपि
न सर्गान्तरे विपरीयते न हि जातु कश्चित्सर्गे ब्रह्महत्यार्थहेतुरनर्थहेतुश्चाश्वमेधो भवति अग्निर्वा द्र
ग्पतिश्चायो वा हृद्वति तद्वेतत्र यथात्र सर्गे निपतानुपूर्वीवेदाध्ययनमभ्युदयनिःश्रेयसहेतुरन्यथा तद्दे
वा विद्वज्जनतपानर्थहेतुः एवं सर्गान्तरेऽपीति तदनुरोधात्सर्वज्ञोऽपि सर्वशक्तिरपि पूर्वपूर्वसर्गानुसारे
ण वेदान्विरचयन्न स्वतन्त्रः पुरुषास्वातन्त्र्यमात्रं चापौरुषेयत्वं रोचयन्ते जैमिनीया अपि ते चास्माकम्

५

वा.प्र०

पि समस्तमन्यत्राभिनिवेशात् न चैकस्य प्रतिभाने ऽनाश्वास इति युक्तं न हि बहूनामज्ञानां नो वाप्याज्ञानानामाशय
२२ दोषवतां प्रतिभाने युक्त आश्वासः तत्र ज्ञानवतस्तु यास्तु समस्तदोषस्यैकस्यापि प्रतिभाने युक्त एव आश्वा
सः सर्गादौ हि भगवान् प्रजापतिर्देवर्षीणां धर्मज्ञानवैराग्यैश्वर्यसंपन्नानामुपपद्यते तत्त्वरूपावधारणं तत्प्रत्यये
न चार्वाचीनानामपि तत्र संप्रत्ययः उपपन्नं ब्रह्मणः शास्त्रयोनित्वं शास्त्रस्य वा पौरुषेयत्वं प्रामाण्यं चेति
वृत्तौ कोऽतरमारभते अथवेति पूर्वेणाधिकरणेन ब्रह्मस्वरूपलक्षणं संभवाशंकां व्युदस्य लक्षणसंभव उ
ना क्तः तस्यैव तु लक्षणस्यानेनानुमानत्वाशंकामपाकृत्यागमोपदर्शनेन ब्रह्मणि शास्त्रप्रमाणमुक्तम् लक्षणत्वे
त्वात्तिरोहितार्थः । शास्त्रप्रमाणत्वमुक्तं ब्रह्मणः प्रतिज्ञामात्रेणानंतरं तेन सूत्रेणोपपादनीयमित्यतः सूत्र
पूर्वपक्षमारचयति भाष्यकारः कथं पुनरिति किमाक्षेपे शुद्धबुद्धोदासीनस्वभावतयोपेक्षणीयं ब्रह्मभूतमभि
दधतो वेदान्ता नाम पुरुषार्थोपदेशिनामप्रयोजनत्वोपपन्नं भूतार्थत्वेन च प्रत्यक्षादिभिः समानविषय
तया लौकिकवाक्यवत्तदर्थानुवादत्वेनाप्रामाण्यप्रसंगात् न खलु लौकिकानि वाक्यानि प्रमाणान्तरे
विषयमर्थमवबोधयंति स्वतः प्रमाणानि स्युः एवं वेदान्ता अपीत्यनपेक्षत्वलक्षणं प्रामाण्यमेषां व्याहन्येत न
च तेषु प्रमाणो भवितुं युक्तं न चाप्रयोजने स्वाध्यायाध्ययनविधिधापितप्रयोजनवत्त्वनियमात् तस्मात्त्वे राम
२२

परत्वेनैव

द्विहितकर्मोपासितकाद्दैवतादिप्रतिपादनेनवाक्यार्थत्वंपरि।त्वसन्निधानात्तत्परत्वंनरोचयते।ततः
सन्निहितोपासनादिक्रियापरत्वंवावेदान्तानांस्वंचप्रत्यक्षाद्यनधिगततगोचरत्वेनानपेक्षतयाप्रामाण्यंच
प्रयोजनवत्त्वंचसिद्ध्यतीतितात्पर्यार्थः।पारमर्षेसूत्रोपन्यासस्तुपूर्वपक्षदार्ढ्यायआनर्थक्यंचाप्रयोजन
त्वंसाधयेत्ततयाप्रमाणानुवादकत्वंवानुवादकत्वादितिअतइत्यादिवाक्यग्रहणंकवाक्यमस्यविभाव्यंगभा
व्यंनहीत्याद्युपपन्नावेदान्ताःस्मार्तेतत्रआक्रियार्थत्वेपिब्रह्मस्वरूपविधिपरावेदान्ताभविष्यन्तितथाचविधि
नात्वेकवाक्यत्वादितिराद्धान्तसूत्र।मनुग्रहीष्यतेनखल्वप्रवृत्तप्रवर्त्तनमेवविधिःरूपान्त्रविधेरज्ञात
ज्ञापनार्थत्वात्वेदान्तानांचाज्ञातब्रह्मज्ञापकत्वंतथाभावादित्यतआहनचपरिनिष्ठितइतिअना
गतोत्पाद्यभावविषयएवहिसर्वोविधिरूपेयः।अधिकारविनियोगप्रयोगोत्पत्तिरूपाणांपरस्पराविना
संख्यानिरोधोपि व्याख्यातः संतानगोचरो वा निरोधः संतानिरुद्धे गोचरो वा न तावत्सं
तानस्य निरोधः संभवति हेतुफलभावेन निरवस्थितः संतानिनः एवोऽप्येवं वध्यमी कम
ए: संतानं ततेपो स्या वर्तः संतानीयन्निरोधात्संतानोच्छेदे न भवितव्यं सर्वफलेदंचि
तारम्भते न वा आरम्भते चेन्नोतः ॥ तथा च न संतानोच्छेदः अनारम्भेतु भवेदस्यः किं तुस्या
दसत् ॥ अप्रतिक्रियाकारितायाः संतानच्छेदस्य विरहात् ततः सत्वेत ज्ञानक मप्यसत्त्वं न कत्वेना

मदित्यनेन क्रमेण संततः सर्व एव संतानिनः इति तत्संतानोऽनितरामसन्निति तस्य प्रतिसंख्या
नानिरोधः॥ न च सभागानां संतानानां हेतुफलभावः संतानस्यास्य विभागोत्पादो निरो
धः विसभागोत्पादक एवलक्षणः संतानस्यान्तरः इति वाच्यं॥ तथा सति रूपादिज्ञानं प्रवा
हे रसादिविज्ञानोत्पत्तौ संतानोच्छेदप्रसंगः॥ कथं चेत्सारूप्येकाविसभागेष्वपि ततः स
न्तपातेऽस्मीति न संतानोच्छेदः तदनेनाभिसंख्यापि नाह सर्वेषां च संतानेषु संतानि
नामविच्छिन्ने न हेतुफलभावेन संतानविच्छेदस्यासंभवादिति॥ नापि भावगोचरोऽसं
भवतः प्रतिसंख्याप्रतिसंख्यानिरोधौ॥ अत्र तावदुत्पन्नमात्रापहतस्य भावस्य न प्र
तिसंख्यानिरोधः संभवति तस्य पुरुषप्रयत्नोपेक्षाभावादितस्कैव दूषणं॥ तथापि दे
शांतरसंभवस्थितेऽपि निरोधे इति॥ न हि भावानामिति॥ यतो निरन्वयो विनाशो न सं
भवत्यतो निरुपाख्योऽपि न संभवति॥ तेनान्वयिना रूपेण भावस्य नष्टस्याप्युपाख्ये
यत्वात् निरन्वयविनाशाभावे हेतुमाह सर्वाच्चाप्यवस्थासु इति यदन्वयिरूपं तन्न

तत्परमार्थसद्भावः अवस्थास्तु विशेषा रव्या उपजनापायधर्माणः तासां सर्वासामनिर्वचनीयतया
स्वतो न परमार्थसत्वं अन्वय्येव तेन रूपेतासां तत्वं तस्य च प्रत्यभिज्ञाभावस्य नष्टस्याप्युपलभ्य
मानत्वात् न विनाश इति ॥ अवस्थावतोऽविनाशेऽवस्थानां निरन्वयो विनाश इति
तासां तत्वस्यान्वयिनः सर्वत्राविच्छेदात् स्यादेतत् ॥ मृत्पिण्डमद्घटमत्कपालादिषु सर्वत्र
मृत्तत्वं प्रत्यभिज्ञानादवगतमेवं ॥ न तु प्रदीपकलिकायां तन्नष्टस्य तद्द्विविधः किमस्ति रूपम
न्वयि प्रत्यभिज्ञायमानं येनास्य न निरन्वयो विनाशः स्यादिति चेत् अन्यद्प्रत्यभि
ज्ञायमानं स्वरूपमिति तत्राप्येतत्तेजोरूपं तेजःसामान्यं तदुपलब्धुं दत्त्वापनीयत इति अनुमेयं ॥
मृत्पिण्डानामन्वयिनामविच्छेददर्शनात् ॥ तत्र तत्रैवं हि ॥ उदबिन्दौ च क्षितौ चेतोपमा वा न लभ्
५२ यते । विनष्टेऽपि तत्र तत्र दृष्टितेजो विद्यते तस्यान्वयिनो बुद्ध्यो । तस्मान्न क्वचिदपि निरन्वयो
नाश इति सिद्धं ॥ अथ यथा च दृष्टान्तः ॥ चरिकरः सामग्रीसम्पत्तानस्य यमनियमा
दिः श्रवणमननादिश्च मार्गः हेतुर्णनेन रात्र्यादिभावनाश्रितिरोहितमन्यत ॥ क्वनाशो

वा.र.२
२८

चाविशेषात्॥ यच्च तेषामिति॥ वेदसामान्ये विप्रतिपन्नो न विप्रतिपद्यते शब्दगुणानुमेयत्वमाकाश
स्य वक्तव्यं॥ तथा हि जातिमत्वेन सामान्यविशेषसमवायेभ्यो विभक्तः स्पर्शाद्स्पर्शस्प
ते र्शवत्वेनात्मनि मनसि तेषां श्रावणेन्द्रियग्राह्यत्वेन गन्धादिवत् गुणत्वमनुमितं न चायमात्मगुणो
बाह्येन्द्रियगोचरत्वात्॥ गन्धादिवत् अत एव न मनसो गुणः॥ तद्गुणानामप्रत्यक्षत्वात्॥
न च पृथिव्यादिगुणः तद्गुणगन्धादिनाहचर्यानुपलब्धेः॥ तस्माद्गुणोऽयं सत्वाद्गन्धादिव
दृश्याधारस्तेन्द्रियग्राह्यो यद्द्रव्यमनुमापयति तदाकाशं पंचमं भूतं वा किंचिति॥ अपि चा
वरणाभावमाकाशमिच्छतइति॥ निषेध्यनिषेधाधिकरणनिरूपणाधीननिरूपणो
निषेधो नास्त्यधिकरणानिरूपणे शशकोनिरूपयितुं तथाचावरणाभावाधिकरणमा
काशं वा किंचिति॥ अतिरोहितमन्यत॥ अनुस्मृतेश्च॥ विभजते अपि च वैनाशिकः स
र्वस्य वस्तुनः क्षणिकत्वमिति॥ पक्षसत्य व्यतास्मिन्नुपलब्धुः स्मर्तुरन्यत्वेपि समानायां संततौ का
र्यकारणभावात् स्मृतिरूपपद्यत इति मन्यमानो न परितुष्यतीति तं प्रति प्रतिभास्ता

समाज्ञातं प्रत्यक्षाविरोधमाहापिचेद्दर्शनकारणयोः कन्रीरीति ततो नेह मद्वाद्वौदिति प्रतीयादिति ॥ अ
हे स्मरामी अन्य तत्त्वद्राह्मीदित्यर्थः ॥ प्रत्यभिज्ञा प्रत्यक्षाविरोध प्रपंचयत्युत्तरः अज्ञानन्न नआचोत
मादुष्टीस्मात अस्मरणादित्यर्थः ॥ न नस्मादस्यनिवेद्यं नं प्रत्यभिज्ञानं पूर्वापरद्वारणदर्शनएकस्या
ते भावे तदनुपपत्तेः ॥ शंकतैंनेदमहदाम्मिति ॥ प्रत्यभितरमिति ॥ अयमर्थो विकल्पप्रत्यक्षो यंवि
कल्पस्वस्वाकारं वाह्यतया व्यवस्यति ॥ न तु ततः पूर्वापरौ द्वारौ तयोः स्मादृंसंपवाग्र हाितिन त्वाय
मेवस्यानेकदर्शिनः स्थिरस्य प्रसंगदृतिनिराकतेति नेतनेदमिति ॥ अन्न पदार्थापादनादि
तिनानापदार्थसंभिन्नत्वाव्याप्यावभासः तावदयं विकल्पः प्रपंततत्रैतेनानापदार्थीन प्रपंत
न इति वृत्ताणः स्वसंवेद्यते कार्येते चैकस्य ज्ञानस्य नानाकारत्वे संभवति ॥ एकत्वविकोधात ॥ न
चतावत्त्वेन ज्ञानानीति युक्ते तथास्ति प्रत्याकारे ज्ञाना नो समाप्ते तेषां च परस्परवार्त्ता ज्ञाना
भावात ॥ नानान्येव नस्यात तस्मात्पूर्वापरद्वारणतत्वाद्दूरपगोचरत्वे ज्ञानस्य वक्तव्यं ॥ न चेत
त्वर्वापरद्वारणावस्थापि नेमेकज्ञातारविनेति द्वारणभंगमंगमसंगः ॥ यद्युच्येत ॥ अस्तेतस्मि

भद्दालपातीनस्त्वसरो

वा॰ २१२
३५

न्विकल्प्येतेनेदमिदमिति पदद्वयप्रयोगो न त्विह तत्तेदन्तास्पदौ पदार्थौ तयोरश्वमाहिषमिति विवक्षितम
पि त्वेवमाकारता ज्ञानस्य कल्पितेति ॥ तत्राह यद्यपि हि लोकप्रसिद्धः पदार्थ इति ॥ एकाधिकरणे विप्रतिषिद्धध
र्मद्वयाभ्युपगमो विवादः ॥ तत्रैकस्य पक्षे साध्यपदत्वमन्यस्य तत्साधनं दूषयति न चैतत्सर्वमसत्ख्यातिवि
कल्पानां वाच्यालंबनत्वे सति च लोकप्रसिद्धपदार्थविवे भवितुमर्हतीति ॥ तौ नाकारत्वे हि विकल्पप्रति
भासिनो नित्यत्वानित्यत्वादीनामेकार्थविषयत्वाभावात् ॥ ज्ञानानां च धर्मिणो भेदान्न विरोधः ॥
न चात्मनि त्वंत्वे च बुद्ध्यनित्यत्वे च ब्रुवाणो विप्रतिपद्येते ॥ न चालोकेऽपि नानित्यशब्देनात्मनि वि
भुत्वं विवक्षितोः नित्यशब्दं प्रयुञ्जानो लौकिकोऽपि नित्यशब्दमात्मनि प्रयुञ्जानेन विप्रतिपद्यते
तस्मादनेन स्वपक्षप्रतिष्ठापयिषता परपक्षे साधनं नाम निराचिकीर्षता विकल्पानां लोक
सिद्धपदार्थकता च वाच्यालंबनता च वक्तव्या ॥ यद्युच्येत द्विविधो हि विकल्पानां विषयो ग्राह्यश्च वि
अध्यवसेयश्च ॥ तत्र स्वाकारो ग्राह्योऽध्यवसेयपक्षत्वात्तु वाह्यः ॥ तथा च पक्षप्रतिपक्षपरिग्रहलक्षण
विप्रतिपत्तिः प्रसिद्धपदार्थकत्वे चोपपद्यत इत्यत आह एवमेवैषोऽर्थ इति ॥ निश्चितपक्षेन बा

नृथ ६

वक्तव्यं ततो न्यस्तु च्यमानं बहु प्रलापितमात्मनः केवलेरव्यापयेत ॥ अयमप्यसंदिग्धः ॥ केयमध्यवसेयता
वा स्यास्यापादिग्या स्यतां न हे विधं ज्ञयान्यासो च्यतां न न तेते रेवस्वप्रतिभासेनाध्यवसायेन प्रवृत्ति
रिति अपविकल्पाकारस्य को यमध्यवसायः ॥ किं करणम होस्विन्प्रयोजनम्युताहो फलमिति ॥ न ताव
त्करणं न स्यन्यत् कार्यं शक्यं न हि जातु महतमपि शिल्पिनः कटं परिपितुमीशते न चांतरेवा यिन
योजयितुं ॥ अपि च तपास्मन्तिपुत्रं इति प्रत्ययः स्याद् न चास्ति कारो पोपि किं गृह्यमाणेवा प्युत्तराग
रि यिमाणे यद्यपि गृह्यमाणे तदा किंवैकल्पेनाहोस्विन्तत्समयजेनाविकल्पिकेन न तावद्विकल्पो त्रि
लापसंसर्जियोग्यगोचरः अशक्यत्रिलापसमर्थस्वलक्षणदेशकालानुगतगोचरयितुम
र्हति ॥ यथाहु रशक्यसमयो ह्यात्मा स्वरवादीनामनन्यभाक् ॥ तेषामतः स्वसंवित्तिर्नाभिजल्पानुषं
गिणीति ॥ न चैतत्समयभाविना निर्विकल्पकेन गृह्यमाणे वा स्वविकल्पेनागृहीते तत्राविक
ल्पः स्वाकारमारोपयितुमर्हति न हि रजतताना प्रतिभास्विनि शुक्तौ चन्द्रिकानिवस्तु निरजतज्ञाने
न शक्यं रजततमारोपयितुमगृह्यमाणेन वा स्विस्वाकारेतोवंस्मात् न वा स्यइति । तथा च नाशं प्रसं

वा॰ रा॰ ३।

३

अपि चाप्रवैकल्यः स्वसंवेदनेसंतं विकल्पः किं वस्तुसंतं स्वाकारं गृह्णीतापि आहू समारोपपदार्थं वा पदा
र्थाकारं गृह्णातीति तदेवार्थमारोपयतीन तावत्सीयत पाञ्चमविरहितं स्वात स्वपत्र मव त्तिनीय गृहणात्को
परोक्तलेते तस्यापदेव स्वाकारमर्पमनर्पं गृह्णातीति तदेवार्थमारोपयतीति वक्तव्यं न चैवं युज्यते॥
स्वाकारो हि स्वसंवेदनप्रत्यक्षतया ज्ञातिविषयो वा स्वेचारोप्यमाणमविषयं स्वरूपतः सन्तोन्य
देव स्याकरु स्वाकारः समारोपितो न च भेदग्रहणमात्रेण समारोपाभिधाने वैशद्यावैशद्यरूपयो
भेदग्रहस्याकल्पात अपि च कल्पस्य मात्रे चेद्भूयः वा स्यात्स्वलक्षणं तग्रहणेन तदाभिमुख्यवि
प्रवृत्तिः हेतनर्हि त्रैलोक्यमत एकोनेन मेदग्रहीत इति यत्र कचन वर्तताविशेषादेतेन ज्ञाना
कारस्येवालीकस्यापि वाप्पितसमारोपः प्रत्युक्तः॥ तस्मात्स्वरूपं तत्तोन्यदुच्यमानं वस्तु प्रलापितं
मात्रतः स्वापर्योरितिः॥ अपि च सादृश्यनिबंधनसंव्यवहारस्तेन हेत्वदृश्यमित्येवमाकारबुद्धि
निबंधनो भवेन्न तु तदेवेदमित्याकारबुद्धिनिबंधनइत्याह न चापं सादृश्यात्संव्यवहार इति
नेत्रज्वालादि सादृश्यादन्यत्रमपि सादृश्यबुद्धौ तद्बुद्धौः प्रमाणनिबंधनः संव्यवहारो दृश्यते यथा

तथेहापि भविष्यतीति चेदीपरितो वेणाह भवेदेवं विकारनिबद्धो वेदकम्मीति ॥ तथाहि विविधज
नसंकीर्णगोपुरेण पुरं विविशमानेन नरेन्तरेभ्यस्तस्मान्निःसरणमपाक्रियमाणत्वाच्च हि विद्यत
मुपलभंतेति पाशुपतं दर्शनं नाद्रियते ॥ नासतोऽदृष्टत्वात् ॥ इतश्चानुपपन्नो वैनाशिकसम
यइति असिद्धिरात्कार्योत्पत्तिमिच्छतो वैनाशिकानामपीदभावाद्भावोत्पत्तिमाहुः उक्तं हि
तदपि स्यात ॥ निरपेक्षात्कार्योत्पत्तौ नोपकम्मिवै व्यपेक्षापेक्षितायां चेदोषस्यापेक्षते
नोपकृतत्वानुपकृतत्वानुपपत्तेः ॥ अनुपकारित्वेचापेक्षानुपपत्तेर्दोषाणिकत्वप्रसंगः दुभावाद्
नापेक्षत्वं नपेक्षत्वयोश्चान्यतरनिषेधस्यान्यतरविधाननांतरीयकत्वेन प्रकारांतरा
भावोन्नास्थिरत्वभावाद्भावोत्पत्तिरितिवेत्तत्किंपदेयदि भावाद्भावोत्पत्तिः परिच्छिद्यत इत्य
र्थः ॥ न केवलमर्थादापद्यते ॥ दर्शयंति च नानुपमृद्य प्रादुर्भावादिति ॥ एतद्विभजते बी
जप्रतिलिते ॥ किल कारणं निघ्ना कूटस्थात्कारणात्कार्यमुत्पद्येतापि सर्वं सर्वत
उत्पद्येत अपमभिसंधिः ॥ कूटस्थाद्धि कार्योत्पत्ते नस्ते सम भावो वा स्यात् अतत्त्वभावो वा

वी सेरा
३१

सचेत्कार्यं जनयन् न स्वभावः। ततो यावद् अनेन कार्यं न कर्तव्यं तावत्सहसैव कुर्वीत समर्थस्य हे
पायोगात्। अतत्स्वभावत्वे तु न कदाचिदपि कुर्वीत यद्युच्येत समर्थोपि क्रमवत्सहका
रिसन्निधिक्रमेण कार्याणि करोतीति तदप्युक्तं॥ विकल्प्यासहत्वात्॥ किमस्य सहकारिणः
केचिदुपकारमादधति न वा। अनाधाने नुपकारिणो नापेक्षणीयाः। आधाने पि भिन्नम
भिन्नं वोपकारमादध्युः। अभेदे तदेवाभिहितमिति कोटरस्येव्याहन्येत भेदे तदुपकारस्य त
स्मिन्सति कार्यस्य भावात् असति तस्मिन्सत्यपि कोटरस्य कार्यस्यानुत्पादात् अन्वयव्यतिरेका
भ्यामुपकार एव कार्यकारी न भाव इति नार्थक्रियाकारी भावः। तदुक्तं॥ वर्षातपाभ्यां किं व्यो
म्नश्चर्मण्यस्ति तयोः फलं। चर्मोपमश्चेत्सोऽनित्यः खतुल्यश्चेदसत्फल इति॥ तथा
चाकिंचित्करादपि चेत्कस्यचित्कार्यं जायते कस्मिन्सर्वं सर्वस्माज्जायेतेति स्मृतं॥ उपसं
हरति तस्मात् भावस्यासत्त्वमिति॥ तत्रेदमुच्यते॥ नासतो हेतुत्वादिति नाभावात्॥
कार्योत्पत्तिः कस्माद्धेतुत्वात् न हि प्रमाणविषया अहेतुरो हीनो कार्याणामुत्पत्तिर्दृश्यते यदि

त्वभावाद्भावस्योत्पत्तिः स्यात्ततोऽभावत्वाविशेषात् शशविषाणादिभ्योऽप्यंकुरोत्पत्तिः न ह्यभावो विशेष्यते ॥
विशेषणयोगेनाभावो विभावः स्यात्तन्निरुपाख्यत्वहत्यर्थः ॥ विशेषणयोगमभावस्याभ्युपेत्याह नाप्य
भावः कस्यचिद्धेतुरिति अपि च यद्येनानन्वितं न तत्तस्य विकारो यथा घटशरावोदंचनादयो हे
म्नानन्विता न हेम्नो विकाराः ॥ अनन्विताश्चैते विकारा अभावेन तस्मान्नाभावविकाराः ॥ विका
राः स्वभावस्यैते नान्वितत्वादित्याह अभावाच्चाभावोत्पत्ताविति ॥ अभावकारणत्वादिनोत्तरं च न स
न्भाष्यं दूषयति यदुक्तमिति स्थिरेषु च भावः क्रमयौगपद्याभ्यामकारित्वव्याख्यानात् क्रमेण कार्यो
त्पादकत्वेति न चानुपकारकाः सहकारिणः स्वचास्य सहकारित्वं तदर्थोपमानत्वं उपकारे नाभिन्नो
नाप्यभिन्नः किं त्वनिर्वाच्य एव स आनिर्वाच्यात्तु कार्यमप्यनिर्वाच्यमेव जायते ॥ न चैतावता स्थिर
स्यापि करणत्वं तदुपादानत्वात् कार्यस्य रज्जूपादानत्वमिव भुजंगस्येत्युक्तं ॥ तथा च श्रुतिः ॥ स
त्येके तेव सत्यमिति ॥ अपि च येऽपि सर्वे ते विलक्षणा निस्वलक्षणा निवर्तु मता ॥ स्थिरं तेषा
मपि किमिति बीजजातीयेभ्योऽङ्कुरजातीया नैव जायंते कापीति न तु क्रमेण लक्षजातीयानि ॥ न

का॰ सा॰र

३२

हिबीजाद्धिज्ञातरस्यवाक्रमेलकस्यवात्यंतवैलक्षण्यकस्मिन्हिशेषः॥ नचबीजांकुरत्वेसमानेपि
परमापिसतीयेनैतयोर्भिविनः कार्यकारणभावोभवेत॥ तस्मात्कालत्वनिकारेचस्थलहृत्तोपाद
नाद्धिजन्नातीयात तथाविधस्यैवांकुरजातीयस्योत्पत्तिनियमः ग्राह्यस्तेन न्याया कार्यहेतुकानु
मानोछेदप्रसंगः॥ द्विज्ञात्रमत्रसन्नचतंप्रपंचतत्त्वग्रहत्वतत्वसमीक्षान्यायकणिकायाः कृतंइ
तिनेहप्रतन्यतेविस्तरभयात॥३॥ इतीनानामपिचैवंसिद्धः॥ भाष्यमस्यसूत्रगमं॥ नाभाव
उपलब्धेः॥ नकोधि कारणसंगतिमाहतत्वस्मीति॥ बाह्यार्थवादिभ्योविज्ञानमात्रवादिनोस्तुगता
भ्यप्रेतह्याविशेषमाहकेचोन्मितिल्लेति॥ अपप्रमाताप्रमाणंप्रमेयंप्रमितिरितिहिचत
स्पृविधास्तुतत्वपरिसमाप्तिरासामन्यतमाभावेपितत्वस्याव्यवस्थानात तस्माद
नेनविज्ञानस्कंधमात्रेतत्वंव्यवस्थापयताचतस्रोविधाएषितव्याः॥ तथाचनविज्ञान
स्कंधमात्रेतत्वेनत्वक्तिसंभवः विज्ञानमात्रेचचतस्रोविधाज्ञातकृतआहतस्मिंश्चविज्ञान
वादेऽभ्युपगतेनतस्रूपेरोगति॥ यथप्यनुभवान्नान्योनुभाव्योस्तिनानुभवितानुभवितानुभवने

चतथापि बुद्ध्यारूढेन बुद्धिकल्पितेनांशेन तस्य एवैष प्रमाणप्रमेयफलव्यवहार प्रमाताप्रमेयत्वापि द्रष्टव्यं न
पारमार्थिक इत्यर्थः॥ एवं च न सिद्धसाधनं नहि ज्ञानवादिनो नीलाद्याकारो विज्ञप्तिमभ्युपगच्छंति
किंतु निर्वचनीयं नीलादीति॥ तथाहि स्वरूपं विज्ञानस्यासत्त्वाकारपुंजं प्रमेयं प्रमेयप्रकाशनं प्रमाणं
फलं तत्प्रकाशनेशक्तिः प्रमाणं नायथावादिनोरपि वैभाषिकसौत्रांतिकयोः कैलानिक एवं प्रमाणफ
लव्यवहारोभिमत इत्याह सत्यपि बाह्यार्थे इति॥ भिन्नाधिकरणत्वे हि प्रमाणफलयोः कुठारो न स्या
त् नहि खदिरगोचरे परशौ पलाशे द्वैधीभावो भवति तस्मादनयोरेकाधिकरणत्वं वक्तव्यं न चैतदप्रा
कृतिपक्षे ज्ञानस्य एव प्रमाणफले भवतो न हि ज्ञानं स्वलक्षणमनंशाभ्यां बुद्ध्या संक्रामत्येतदेवज्ञा सं
नमज्ञानव्यावृत्तिविकल्पितज्ञानत्वांशं फलं अज्ञानव्यावृत्तिपरिकल्पिता तेनात्मप्रकाशनांशं प्रमाणं प्रमे
प्रमाणं प्रमेयं च स्वस्वांशमेव॥ एवं सौत्रांतिकमतमप्यविज्ञानस्यार्थसारूप्यमनीलाकारव्यावृत्त्या क
ल्पितनीलाकारत्वं प्रमाणं व्यवस्थापनहेतुत्वात्॥ अज्ञानव्यावृत्तिकल्पितं च ज्ञानत्वं फलं व्यवस्था
प्यत्वात्॥ तथा चाह॥ न हि वित्तिसत्तैव तद्वेदना युक्ता तस्याः सर्वत्राविशेषात्॥ तां तु सारूप्यमाविशत्स

२२ रूपयरतत्र घटयेक्षितिप्रसङ्ग एवं किंवा स्थायीभावउपपत्तौ तत्र कथं पुनरवगम्यत इति सहैव ज्ञानालंबनत्वा
नामं भिमतो वा स्थौल्यः परमाणुःस्यात् वक्तुं संभवति एकस्य स्थूलनीलाभासं हि ज्ञानं न परमाणुस्वरूपम् परमाणव एवाभा
संते न चान्याभासं मनस्य गोचरं भवितुमर्हतीति अति प्रसंगेन सर्वं गोचर तथा सर्वे सर्वत्र तत्प्रसंगात् ॥ न
स्थौ च प्रतिभासधर्मः स्थौल्यमिति पुनः विकल्पा सहत्वात् ॥ किमयं प्रतिभासस्य ज्ञानस्य धर्म उत प्रति
भासनकालेऽर्थस्य धर्मः यदि पूर्वः कल्पो ज्ञातथा सति स्थौल्याकालेवनमेव स्वविज्ञानम भ्युपेतं भव
ति एवं च कः प्रतिकूलो भवत्यनुकूलमाचरति ॥ द्वितीयइति चेत ॥ तथाहि रूपपरमाणव एव निरंतर
मुत्पन्ना एकविज्ञानोपारोहिणः स्थौल्यं न चात्र कस्य चित् ज्ञो तता न हि अते रूपपरमाणवो न च न नि
रंतरमुत्पन्ना न चैकविज्ञानानुपारोहिणः ॥ तेन माभूत् नीलत्वादिवत् परमाणुधर्मः प्रत्येकं परमाणु
ष्वभावात् ॥ प्रतिभासदशायां ये ज्ञानं तु तेषां भविष्यतिवहुत्वात् इत्यसाधुतं स्थौल्यं ॥ यथाहुः ॥ ये
ऽनेकस्य चैकेन किंचिद्वपुर्हि गृह्यते ॥ सोऽवृतं प्रतिभासस्य तदेकात्म्यसंभवात् ॥ न च तद्रूपिणेऽर्थो
तेनानावभासम् अहं तः सौ वृत्ते ग्रहणं नानात्वं न च वक्तुं स्वप्रत्यक्षत्वं इति तत्र न निरंतरतयावभास

स्पृष्टोतत्वात् गंधरसस्पर्शपरमाणवंतरिता हि ते रूपपरमाणवो न निरंतरास्तस्मादाप्तास्तांतरेषु च
देशेषु न घनत्वेन प्रसिद्धये देशस्थूलप्रत्ययः परमाणुषु सांतरेषु भ्रांतिरेवेति प्रथमः। तस्मात्कालस्य
नापि भेदेऽपि भ्रांतत्वात् घटादिप्रत्ययस्यापीतरांश्चादिज्ञानवर्जप्रत्यक्षता परमाणुगोचरत्वाभ्यु
पगमे तदिदमुक्तं नैतावता परमाणवः स्तंभादिप्रत्ययपरिच्छेद्या भवितुमर्हंतीति नापि तत्स
महात्मतं भाद्यो अवयविनः तेषां मभेदे परमाणुभ्यः परमाणव एव तत्र चोक्तं दूषणं। भेदे तु
गवाश्वस्येवाप्येतवैलक्षण्यमिति न तादात्म्यसमवायपक्षनिराकृत इति॥ एवं भेदाभेदवि
कल्पेन जातिगुणकर्मादीनपि प्रत्याचक्षीत तस्मादध्यक्षप्रतिभासितस्य सर्वस्य विचारा
सहत्वात् अप्रतिभासमानस्य द्रव्येव प्रमाणाभावात् न बाह्यालंबनाः प्रत्यया इति॥ अ
पि च न तावदृष्टानामिंद्रियवाह्मिलीनमर्थं प्रत्यक्षयितुमर्हति। नहि चक्षुरूपमप्यविषयं
विज्ञानं जनयत्येव विज्ञानमपरोक्षितानं जनयितुमर्हति। तत्रापि समानत्वादनुयोगस्या
नवस्थाप्रसंगात्॥ न चाप्याधारे प्राक् स्थूलत्वेन फलमाधातुमुत्सहते॥ अतीतानागतेषु

बो॰ रा॰ रो॰ दनेभवात॥ न ह्यत्र संभवो प्रत्युत्पन्नो धर्मी धर्मस्यास्य प्रत्युत्पन्न इति॥ तस्मात् ज्ञानरूपप्रत्यव-
तेवाप्यप्रत्यक्षता प्रत्युपेयात ज्ञानाकारस्य तु ज्ञानतो भेदाभावात्तदपरमर्थभेदं व्यवस्थापयेदिति।
३४ एतद्भेदव्यवस्थापनाय आकारभेदोस्य वक्तव्यः। तदुक्तं। न हि वित्तिसत्तैव तद्वेदना युक्ता। तस्याः
सर्वत्राविशेषात्। तां तु सारूप्यमाविशत् सरूपयन्ततद्घटयेदिति। एवमायमाकारो नुभूयते
सर्वे हि ज्ञानस्य नार्थसङ्गो वेदितं च न प्रमाणमस्ति। तो ह ज्ञापि चानुभवमात्रेण साधारण-
त्वेनोत्पानस्येति। यचि च सहोपलम्भनियमादिति। पक्षेनेनियतसहोपलम्भेन ततो ना-
भिघातो यथैव स्यात्तदेकत्वं तीव्र चेद् न्यायानियतसहोपलम्भस्यार्थज्ञानेति व्यापकविरु- ने
द्धोपलब्धिः॥ निषेध्यो हि भेदः सहोपलम्भानियमेन व्याप्तो यथा भिन्नावभासिनो नावश्यं स-
होपलम्भो तो कादाचित्कः प्रतिघाते अन्यतरस्यैकस्योपलब्धेः सोपमिह भेदव्यापकानि-
यमविरुद्धो नियमस्तु पलभ्यमानस्तद्भावं भेदं निवर्त्तयतीति॥ तदुक्तं॥ सहोपलम्भनियमा-
द भेदो नीलतद्धियोः॥ भेदश्च भ्रान्तिविज्ञानैर्दृश्येतेन्दाविवाद्वय इति स्वप्नादिवच्चेदं द्रष्टव्ये
३४

यः प्रत्ययः स सर्वो वा स्यान्नालम्बनो यथा स्वसमनन्तरादिः प्रत्ययः तथा चैष चित्तादावध्यासितः प्रत्ययः
इति स्वभावहेतुर्वा स्यान्नालम्बनतादि प्रत्ययत्वमात्रानुवेधिनी वृत्ते कदाचित्कालमात्रानुवेधि
नीति तन्मात्रानुवेधिनि निरालम्बनत्वमात्रे भवति प्रत्ययत्वे स्वभावहेतुः अन्योन्तरेण्यो न्योन्याति
तेः चोदयति कथं पुनरसत्त्विति वा हि पीतनीलस्निग्धपीतस्निग्धस्निग्धादिप्रत्ययवैचित्र्यमुपपद्यते म
हिमेनेयेपास्मिन्सत्यपि कादाचित्कत्वे सर्वे तदापि तिरिक्तहेतुमपेक्षा यथाऽविवक्षितप्रत्ययविशेष्य
मिषति मयि चवनगमनप्रतिभासः प्रत्ययान्तरेण तत्सन्तानान्तरमपेक्षाः तथा च विवा
दाध्यासिताः सत्यप्यालयविज्ञानसन्ताने षडपि प्रवृत्तिप्रत्यया इति स्वभावहेतुः पश्चा
मानालयविज्ञानसन्तानातिरिक्तः कादाचित्कप्रवृत्तिज्ञाननिमित्तहेतुः सर्वास्योपदि इति वास विशेषः
नापरिपाकप्रत्ययकादाचित्कत्वात्कादाचित्कुत्पत्त्या इति चेन्नालयैकसन्ततिपतिताना
मालयविज्ञानानां तत्प्रवृत्तिविज्ञानजननशक्तिर्वासना तस्याश्च स्वकार्योपजनने प्रातिमु
ख्यमनुरूपपरिपाकः तस्य च प्रत्ययः स्वसन्तानवर्ती पूर्वक्षणः सन्तानान्तरापेक्षानपेक्षपग

वा॰म॰ ३५

मात॥ तथा च सर्वेष्वालयविज्ञानसंतानपातिताः परिपाकहेतवो भवेयुः न चालयस्येद्ध्यालय
संतानोत्पातित्वाविशेषात्॥ दृष्टमेदाच्छक्तिमेदः स्वसंतानस्य च कादाचित्कत्वात् कार्यकादाचित्कत्व
मिति चेत् न न्वेनमेकस्यैव नीलज्ञानोपजननसामर्थ्यं तत्प्रबोधकसामर्थ्यं चेति द्वन्ततस्य
तत्कस्यात् सत्वे वा कथं दृष्टमेदात्सामर्थ्यमेदः इत्यालयसंतानवर्त्तिनः सर्वे समर्था
इति तत्समर्थहेतुसन्निधाने कार्यदेशानुपपत्तेः॥ स्वसंतानस्य ज्ञाधीनत्वे नियतव्यवस्य कादाचि
त्कत्वस्य विरुद्धं सहतानतेतस्यापलक्षणाकादाचित्कत्वे निवर्त्त्यमानेहेतैतनापेदालेव्यव
तिष्ठते इति प्रतिबंधसिद्धिः॥ न च तानसंतानान्तरनिबंधनत्वं सर्वेवाभिधीयते प्रवृत्ति
विज्ञानानां विज्ञानवादिभिः अरपितु कस्यचिदेव विच्छिन्नागमनवचनप्रतिभास
स्यप्रवृत्तिविज्ञानस्य अपि च स्वतो तरसंतानोत्तरानिमित्तत्वे तस्यापि सदा सन्नि
धानात् कादाचित्कत्वं स्यात्॥ न हि स्वतो तरसंतानस्य देशतः कालतो वा विप्रकर्ष
संभवो विज्ञानवादे विज्ञानानामितिरिक्तदेशानभ्युपगमात् सर्वत्वाचाविज्ञानानामदेशा

त्मकत्वात् संसर्गस्यादिमत्त्वप्रसंगेनानादित्वे सत्त्वप्रादुर्भावानभ्युपगमात् अचेतनकालत्वेऽपि विप्रकर्षसं
प्रवृत्ति भवः॥ तस्मादस्ति बाह्योऽर्थः प्रत्ययवैचित्र्यानुपपत्तेरन्यानुमानिको बाह्योऽर्थ इति सौत्रान्तिकाः
प्रतिपेदिरे तान् प्रति रत्नाकरेणोक्तं॥ वासना वैचित्र्यादित्याह विज्ञानवादी॥ इदमत्राकूतं॥ स्वसंत
तमात्रप्रभवत्वेऽपि प्रत्ययकादाचित्कत्वोपपत्तौ संदिग्धविपक्षव्यावृत्तिकत्वेन हेतुरनैका
न्तिकः॥ तथाहि बाह्यनिमित्तत्वेऽपि कदाचिन्नीलसंवेदनं कदाचित्पीतसंवेदनं वासनानीलपी सं
तसंनिधानासंनिधानाभ्यामिति चेत्॥ अपपीतसंनिधानेऽपि किमिति नीलज्ञानं न भवति
पीतज्ञानं वा भवति॥ तत्र तस्य सामर्थ्यात् अन्यसामर्थ्याच्चेतरस्मिन्निति चेत् कुतः पुनरयं सा
मर्थ्यासामर्थ्यभेदो हेतुभेदादिति चेत्॥ एवं तर्हि ज्ञानानामपि स्वकारणभेदनिबंधनः शक्ति
भेदो भविष्यति॥ संतानिनो हि ज्ञानः कार्यभेदहेतवः ते च प्रतिकार्यं भिद्यंते॥ न च संतानो ना
म कश्चिदेकरूपोऽस्ति यः ज्ञानानां यद्भेदात् ज्ञानानामभेदोऽनन्तरं न नत्वेन ज्ञानभेदाभेदासंभा
क्तिभेदाभेदे॥ अन्येषामपि ज्ञानानां भेदसामर्थ्योपलक्षणे एव ज्ञाने नीलज्ञानजन न्य

नसमर्थ इति नभयो नीलज्ञानानि जायेरन् । तत्समर्थस्यातीतत्वात् तत्क्षणांतरकालांतरासाम
र्थ्यात् तस्मात् क्षणभेदे च न सामर्थ्यभेदः ॥ संतानभेदे तु सामर्थ्यं भिद्यत इति ॥ तन्न यदि भिन्ना
नां नीलसंतानानां नैव सामर्थ्यं हन्त तर्हि नीलसंतानानामपि भिन्नानामैक्यमस्ति नीला
काराधानसामर्थ्यं सति तन्निधाने पि नीलसंतानांतरस्य न नीलज्ञानमुपजायेत तस्मात् सं
तानांतराणामिव क्षणांतराणामपि स्वकारणभेदाधीनोपजननानां केषांचिदेव सामर्थ्यभेदः
केषांचिन्नेति वक्तव्यं । तथा चैवालयविज्ञानसंतानपातिषु कस्यचिदेव ज्ञानक्षणस्य सतादृशः
सामर्थ्यातिशयो वासनापरनामा स्वप्रत्ययप्रसादितो यतो नीलाकारे प्रवृत्तिविज्ञाने जायते
न पीताकारे कस्यचित्तु सतादृशो यतः पीताकारे ज्ञाने न नीलाकारमिति वासनावैचित्र्यादेव स्व
प्रत्ययसादित्वात् ज्ञानवैचित्र्यसिद्धेर्न तदतिरिक्तार्थसद्भावे किंचनास्ति प्रमाणमिति प
रपामृः ॥ आलयविज्ञानसंतानपतितमेवासंविदितज्ञानं वासनातद्धैचित्र्यात्तु नीलाद्यनु
भववैचित्र्यं पूर्वनीलाद्यनुभववैचित्र्याच्च वासनावैचित्र्यमित्यनादिता नयोर्विज्ञानवासन

यो: तस्मात्परस्परात्र्यपदेशसंभवो बीजांकुरसंतानवदिति॥ अन्वयव्यतिरेकाभ्यामपि वासना
वैचित्र्यस्यैव ज्ञानवैचित्र्यहेतुता नार्थवैचित्र्यस्येत्याह अपि चान्वयव्यतिरेकाभ्यामिति॥ ए
वं प्राप्ते ऽभिमतः॥ नाभाव उपलब्धेरिति॥ न खल्वभावो बाह्यस्यार्थस्याध्यवसातुं शक्यते नह्युपलंभा
भावादध्यवसीयेत तत्तूपलंभे तस्य बाह्यविषयत्वाभावात् सत्यापि वा ह्यविषयत्वे वा स्या
पि वाध्यवप्रमाणसद्भावान्न तावत्सर्वथोपलंभाभाव इति प्रश्नपूर्वकमाह कस्मादुपलब्धे
रिति॥ नहि स्फुरतरे सर्वजनीने उपलंभे सति तदभावः शक्यो वक्तुमित्यर्थः॥ द्वितीयं पदमा
लंबते॥ ननु नाहमेवं ब्रवीमीति॥ निराकरोति नाहमेवं ब्रवीषीति उपलब्धिग्राहिणा साक्षि
णोपलब्धिर्गृह्यमाणा बाह्यविषयत्वेनैव गृह्यते नोपलब्धिमात्रमित्यर्थः॥ अतएवेति वक्ष्य
माणोपपत्तिपरामर्शः॥ तृतीयं पदमालंबते ननु बाह्यार्थस्यासंभवादिति॥ निराकरो
ति नायं साधुरध्यवसाय इति॥ इदमत्राकूतं घटपटादयो पि हि स्फुटमाभासंते तेन तु परमस्त
दर्माः॥ तत्र ऐक्ये नानादिग्देशव्यापित्वे लक्षणं स्थौल्यं ह्यवयव्यपि नानाकारत्वेनावरणेनाव

ना॰ रा॰ ९ ।
रे॰

रणलक्षणेन विरुद्धधर्मसंसर्गेण युज्यते ज्ञानोपाधेरनाकारत्वादेव तथापि तद्देशत्वात्तद्देशत्वके
पाकं प्रत्वरकत्वारकत्वलक्षणैर्विरुद्धधर्मसंसर्गैरस्य नानात्वप्रसज्यमानं ज्ञानाकारत्वेपि नश
केशक्रमेण चित्राकारयितृव्यतिरेकाव्यतिरेकविकल्पैश्च परमाणोरंशवत्त्वे चोपपादितानि वैभा
षिकपरीक्षायां॥ तस्मादुक्तस्यापि च ज्ञानेपि स्थौल्यासंभवो॥ न च तावत्परमाणवाभासमेकं ज्ञान
मेकस्य नानात्मत्वानुपपत्तेः॥ आकारेण च ज्ञानतादात्म्यादेकत्वप्रसंगात्॥ न चैवावयव्याकारं
ज्ञानं तथैव ज्ञानानि तावन्तो ज्ञानानां मिथो वार्तानभिज्ञतया स्थौल्यानुभवाभावप्रसंगात्॥ न च
तत्पृष्ठभावी समस्तज्ञानाकारसंकलनात्मक एकः स्थूलविकल्पोपि डेम्नत इति सांप्रतं॥
तस्यापि साकारतया स्थौल्यायोगात्॥ तथाह धर्मकीर्त्तिः॥ तस्मान्नार्थे न विज्ञाने स्थूलाभासस्त
दात्मनः॥ एकत्र प्रतिषिद्धत्वाद्बहुष्वपि न संभव इति॥ तस्माद्भवतापि ज्ञानाकारस्यैव स्थौल्यं सम
र्प्यमानेन प्रमाणप्रवर्त्तस्य प्रवर्त्तितपर्वकौ संभावासंभवावास्येयैतथाच्चेदं तास्य समर्पकं
ज्ञानाद्भिन्नं वा रूपमपह्नोतुं इति यच्चेज्ञानस्य प्रत्यक्षत्वं व्यवस्थाप्यते विषयसारूप्यमाश्रित्यैवं तन्न

तेन विषयोपहौ तु शक्यः ॥ असत्त्वपर्यंतस्यारूप्यस्य तद्भवस्यापोह्यस्यानुपपत्तेरित्याह न चेत्यादि । न चस्य वि-
षयस्यारूप्यादिति ॥ यस्मात्सहोपलंभनियमउक्तः सोपि विकल्पेन सहते ॥ यदि ज्ञानार्थयोः साहित्ये-
नोपलंभः तदा विरुद्धो हेतुर्भेदं साधयितुमर्हति । साहित्यस्य तद्भिन्नद्वयमेदव्याप्तत्वात् ॥ अ-
भेदे तदनुपपत्तेः ॥ अथैकोपलंभनियमः न एकत्वस्यावाचकः सहशब्दः । अपि च किमे-
कात्मकत्वेनोपलंभः आहो एकोपलंभो ज्ञानार्थयोर्नितावदेकात्मकत्वेनोपलंभ इत्याह
वहिरुपलब्धेरिव विषयस्य ॥ अथैकोऽस्योपलंभनियम इत्याह अथानेवसहोपलंभनियमो विप्र-
त्ययविषययोरुपायोपेयभावहेतुको नाभेदहेतुक इत्यवगंतव्यं ॥ यथाहि सर्वेचाक्षुषप्र-
माकृपान्तर्विशुद्धिबोध नियमेन मनुजै रुपलभ्यते न चैतावता घटादिरूपप्रमाणत्वकोम-
वृतिस्तु प्रमोपायत्वान्नियमएव मिहापि ज्ञानमादिकानुभवोपायत्वादर्थस्यैकोपलंभ-
नियम इति ॥ अपि च यत्रैकविज्ञानेनो चरो घटपटौ तत्रार्थभेदे विज्ञानाभेदं चाभ्युपगच्छति
प्रतिपक्षोरो न चैतदेकात्मकत्वं तदुत्पाह अपिचेत्यादि घटज्ञानं पटज्ञानमिति ॥ तथार्थाभेदेपि

ना०२१२ विज्ञानमेदर्शनात्तद्विज्ञानात्मकत्वमप्यस्य तथा हि तस्याश्च घटदर्शने घटस्मरणमिति ॥ अपि च
३८ स्वरूपमात्रपर्यवसिते ज्ञाने ज्ञानान्तरवार्त्तानभिज्ञमिति यथा भेदस्तेदनगृहीते इति भेदोपि
तदुक्तो नगृहीत एवेत्तु एकस्यानात्मकलौद्धायानेकप्रतिज्ञाहेतुदृष्टांतज्ञानभेदसाध्या
एवं स्वमसाधारणमन्यतो व्यावर्त्तलक्षणं पश्यतः दृष्टिप्रत्यावर्त्तितेपतस्य व्यावर्त्तितेतदने
कज्ञानसाध्यं एवं सामान्यलक्षणमपि विधिरूपकल्पोपोहरूपं वानेकज्ञानगम्यं ॥ एवं
वास्यवासकभावो नेकज्ञानसाध्य एव सविप्लोपलब्धवशेन यत्तदसद्धर्मत्वं यथा नी
लमितिसद्धर्मो नरविषाणमीश्वरइत्यसद्धर्मी ॥ असत्त्वमिति सदसद्धर्मः शाक्यं हि शश
विषाणमसत्त्वं वक्तुं शक्यं च विज्ञानमसत्त्वं वक्तुं यथोक्तमनादिवासनोद्भूतविकल्पपरि
निष्ठितः ॥ कदापि त्रिविधो धर्मो भावाभावोभयाश्रय इति ॥ एवमेतत्प्रतिज्ञावचनमुच्यते
यतस्य येन मुच्यते तदनेकज्ञानसाध्या एवं विप्रतिपन्नो प्रतिपादयितुं प्रतिज्ञेति यत्प्रति
पादयति येन प्रतिपादयति परस्परं प्रतिपाद्यते यस्य प्रतिपादयति तदनेकज्ञानसा

ध्येतिक्षसत्येकस्मिन्ननेकार्थज्ञानप्रतिसंधातरि नोपपद्यते तत्सर्वं विज्ञानस्य स्वांशालंबन
त्वेऽनुपपन्नमित्याह ॥ अपि च द्वयोर्ज्ञानयोः पूर्वोत्तरकालयोरिति ॥ अपि च भेदाश्रयः कर्मफ
लभावो नाभिन्ने ज्ञाने भवितुमर्हति ॥ न खलु छिदा छिद्यते किंतु दारु नापि पाकः पच्यते अपि
तु तंडुलाः तद्वदिहापि न ज्ञाने स्वांशे न ज्ञेयमात्मनि वृत्तिविरोधादपि तु तदतिरिक्तोऽर्थः पा
क्याइव तंडुलाः पाकातिरिक्ता इति भामिरचनाप्रवेशमाह ॥ किं चान्याद्वृत्तानेमित्यभ्युप
गच्छतेति चोदयति नन्वविज्ञानस्य स्वरूपातिरिक्तस्याप्रतीत इति ॥ अपसर्पः ॥ स्वरूपाति
रिक्तमर्थं बोद्धज्ञानं गृह्णातीति तत्स्वरूपप्रत्यक्षं सन्नार्थप्रत्यक्षं भवितुमर्हति न हि चक्षुरिव
तन्निमीलने सर्वेषां च नातिशयः साधयते येनार्थम प्रत्यक्षं सत्प्रत्यक्षं भवेदपि तु तत्प्रत्य
क्षत्वे वार्थप्रत्यक्षता यथाह ॥ अप्रत्यक्षोपलंभस्य नार्थदृष्टिः प्रसिध्यतीति न ज्ञे
यज्ञानांतरेण प्रतीयेत तत्प्रतीतेनार्थविषयं ज्ञानमपरोक्षं भवितुमर्हति ॥ एवं तत्रादित्यनव
स्थातस्मादनवस्थापाद्यविभ्रपतावरं स्वात्मनिवृत्तिज्ञानस्यैतान्न पिचयपाप्रहीकोनप्रही

प्रा॰ ११।२। यं तरमपेक्षते तदेवं ज्ञानमपि न ज्ञानान्तरमपेक्षते किंतु सहैव तन्नमत्वादिति तदेतत्परिहरति नत्वभय
मप्यसत् विज्ञानस्य ग्रहणमात्र एव विज्ञानमनोऽपेक्षितं ग्रहणं किंचानुत्पादे न वस्पाश
२८ कानुपपत्तेः॥ अयमर्थः सत्यमप्रत्यक्षोपलंभस्य नार्थदृष्टिः प्रसिध्यति॥ न तु पलं
ब्धिं प्रति तत्र सहेतुत्वात्पोपलंभान्तरं प्रार्थनीयं॥ अपि तु तस्मिन्निंद्रियार्थसंनिकर्षादी
तः करणविकारभेदरूपस्य ज्ञानमात्र एव प्रमातुरर्थस्योपलंभस्य प्रत्यक्षो भवतः॥ अयं हि
निलीनस्वभावः प्रमातारं प्रति स्वप्रत्यक्षत्वाद्यतः करणविकारभेदमनुभवमपेक्षते
अनुभवस्तु ज्ञोऽपि स्वच्छतया चैतन्याविर्भावो ग्रहणाय नानुभवान्तरमपेक्षते येना
नव स्याभवेत्॥ न च प्रतिकर्मभवोऽनुभव उत्पन्नस्य न प्रमातुः प्रत्यक्षो भव
ति यथा नीलादि तस्माद्यथा यष्ट्या घटं छिन्दन् छेदक्रियादिव्याप्नोति न तु छिदेः छिदन्तरेण
नापि छिदेर्बलेनैव किंतु स्वत एव देवदत्तादिः यथा वा पक्त्रा पाकं पाकेन व्याप्नोति न तु पाके
पाकान्तरेण नापि पाकेनैव पक्ता किंतु स्वत एव देवदत्तादिः एवं प्रमाता नमेयं नीलादिः

म

प्रमेयापेक्ष्या मेऽपि॥ प्रमातृतरावेद्यत्वे यामनेवस्याभावे तत्तत्स्वरूपत्वे विज्ञान ग्रहण मात्रए
व विज्ञानसाक्षिणः प्रमातुः कूटस्थनित्यचैतन्यस्य ग्रहणं कोऽज्ञानत्वादादिति॥ युक्तं समत्वात्
वेभास्वाव भासक भावानुपपत्तेरिति तत्राह साक्षि प्रत्यक्षयोस्त्वभाव वेद्य मा दुपलक्षणूपलभ्यमा
को पपत्तेः॥ मामकत्तानयोः साक्ष्येन ग्राह्यग्राहकभावो ज्ञात ज्ञानयोस्तु वैधम्यादुपपद्यत एव ग्रा
ह्यत्वे च ज्ञानस्य ग्राहकक्रियाजनितफलशालितया यथा वाह्यस्यापीस फले फलांतरानुत्पत्तेर्यी
पाहुः॥ न संविद्यंते फलं फलत्वादिति। अपि तु प्रमातारं प्रति स्वतः सिद्धप्रकटतया ग्राह्यो व्य
पीः प्रमातारं प्रति स्वतो संविदपि प्रकटा यथाहुरन्ये। नास्याः कर्मभावो विद्यत इति॥ स्यादेत
त्। यत्प्रकाशनेतरत् न्येन प्रकाश्यते। यथा ज्ञानार्थो तथा च साक्षीति नास्ति प्रत्यय साक्षिणो वैय
ख र्थ्यमित्याशंक्याह स्वयं प्रकाशस्य च साक्षिणोऽप्रत्यक्षत्वाभ्युपगमात्। तथाहि स्वसाक्षिणः सदा संदे
हिग्ध्याविपरीत स्वानिं साक्षात्कारतानागंतुक प्रकाशत्वे घटे तत्राहि प्रमाता संदिग्धो नापि असं
दिग्धो विपर्यस्त न्नप्य विपरीतः परोक्षमपि मुत्के हमागोपपरोक्षः स्मार न्नपानुभाविकः प्रारम्

वा.।२।२।

४

भ्रमात्रस्य न चैतदन्याधीनसंवेदनत्वे घटते। अनवस्थाप्रसंगात्। तस्मात्स्वयंसिद्धं
तात्तस्यानिष्ठतायाप्रत्यक्षत्वेयाप्रमाणमार्गीयात्त्वादिति॥ किंचोक्तेन क्रमेण ज्ञानस्य स्वय
मवगतत्वाभावात् प्रमातुरनभ्युपगमे च प्रदीपवद् ज्ञानमवभासकं तदनिरपेक्षं स्वय
मेव प्रथतइति ब्रुवतां प्रमाणागम्यं विज्ञानमनवगतं कमित्युक्तं स्यात्। शिलाघनमध्यस्य
प्रदीपसहस्रप्रथनवदवगतञ्चेत्स्वचिदचितप्रकाशेतकृतमवगमेन स्वयंप्रकाशेने
ति च विज्ञानमेवावगंत्रितिमत्वातः शंकते वाढमेवमनुभवरूपत्वादिति। न फलस्य कर्तृत्वं
कर्मत्वं चास्तीति प्रदीपवत्कर्तृत्वेतरमेषितव्यं। तथा च न नास्ति स्वसाधनमिति विपरिहरति। ज्ञान
स्यावगंतृरिति ननु साक्षिस्थाने स्वस्मदभिमतमेव विज्ञानं तथा च नाक्षिप्रएव विप्रति
पत्तिर्नार्थइति शंकते साक्षिणोवगंतुः स्वयंप्रसिद्धतामुपक्षिपताऽस्मि प्रेयता स्वयंप्रथतेवि
नमितोषएवेति॥ निराकरोति नेति। भवतां हि विज्ञानस्योत्पत्त्यादेर्धर्मोऽभ्युपेतस्त
याचास्य फलत्वे तथा नावगंतृत्वे कर्तृफलभावस्यैकत्वविरोधात्॥ किंतु प्रदीपादिवल्लभते स्वयं॥

ड

वैधर्म्याच्च न स्वप्नादिवत्॥ बाधाबाधौ वैधर्म्यं स्वप्नप्रत्ययो बाधितो जाग्रत्प्रत्ययस्त्वबाधितस्तथापि
बाधकस्य जाग्रत्प्रत्ययस्याबाधितत्वमसिद्धं तेन हि स्वप्नप्रत्ययो बाधितो मिथ्यात्वमवगम्यते जाग्रत्प्रत्य
यस्य तु बाध्यते स्वप्नप्रत्ययस्यासौ न बाधको भवेत् न हि बाध्यमेव बाधकं भवितुमर्हति॥ तथा च
न स्वप्नप्रत्ययो मिथ्येति साध्यविकलो दृष्टान्तः स्यात् स्वप्नवदिति तस्माद्बाध्याबाध्याभ्यां वैधर्म्य
मस्य स्वप्नप्रत्ययदृष्टेन तेन जाग्रत्प्रत्ययस्य शक्यं निराकर्तुमेवं न तत्त्वमध्यवसातुं निर्ग्लानमिति
कारणदोषाभिधानेन मिथ्यात्वोपवैधर्म्यान्तरमाह॥ अपि च स्मृतिरेवेति संस्कारमात्रजे हि विना
नेन्द्रियवृत्तिः प्रत्युत्पन्नेन्द्रियलिङ्गशब्दसादृश्यान्यथानुपपत्त्युपमानयोग्यप्रमाणानुपलब्धित
दृष्टसामग्रीप्रभवेन ज्ञानमुपलब्धिः तदिह निद्राणस्य सामग्र्यन्तरविरहात्संस्कारः परिशि
ष्यते। तेन संस्कारजन्यत्वात्स्मृतिः सापि च निद्रादोषाद्विपरीतार्कवर्ष्मा मानमपि पित्रादिवर्त्त र्न्ते
मानतयाभासयति॥ तेन स्मृतेरेव तावदुपलब्धेः विशेषः॥ तस्मात्स्मृतेर्विपरीत्यामिप्रत्ययतोऽस
हदृतरमित्यर्थः॥ अपि च स्वतः प्रामाण्यमारोपयसि दृष्टे जाग्रत्प्रत्ययानां प्राथम्यमनुभवसिद्धं नानु

बौ० २।२
४१

मानेनान्वयपितुं शक्यमनुभवविरोधेन तदनुत्पादादवाधितविषयताप्यनुमानेनोत्पादसामग्रीन
चकारणाभावे कार्यमुदेतुमर्हतीत्याशयवानाह अपि चानुभवविरोधप्रसंगादिति॥ नभावोनु
पलब्धेः॥ यथालोकदर्शने चान्वयव्यतिरेकावनुक्रियमाणावर्थ एकोपलब्धेर्भवितोनापीनेय
ष्टा पौ वासनायां वासनायाः अप्यर्थोपलब्ध्यधीनत्वदर्शनादित्यपि॥ अपि चाश्रयाभावादपि
न लौकिकी वासनोपपद्यते। न च क्षणिकमालयविज्ञानं वासनाधारो भवितुमर्हति द्वयोर्युग
पदुत्पद्यमानयोः सव्येतरविषाणवदाधाराधेयभावाभावात्॥ प्रागुत्पन्नस्य चाधेयोत्पा
दसमयेस्ततः क्षणिकत्वव्याघातइत्याशयवानाह अपि च वासनानामिति॥ दोषमतिदेशि
तार्थे॥ एतेन क्षणिकत्वेति॥ स्यादेतद्यदि साकारं विज्ञानं न संभवति नाप्यर्थाः स्थूलस्तदापि तत्स्थे
नासंभवी हन्तैव मर्यज्ञाने सत्वेन तावद्विचारं न सहते नाप्यसत्वेनासतो भासनायोगात्
नोभयत्वेनाविरोधात् सदसतोरेकत्वानुपपत्तेर्नाप्यनुभयत्वेनैकान्तनिषेधस्येतरविध्यान
न्तरीयकत्वात्। तस्माद्विचारासहत्वमेवास्तु तत्ववस्तूनां यथाहुः॥ इदं वस्तुबलायातं यद्वदं

ति विपश्चितः॥ यथा यथायं श्रीत्यं ते विविच्यते तथा तथेति॥ न कश्चिदपि वक्तव्यवतिष्ठते इत्यर्थः। तदेत
न्निराचिकीर्षुराह सत्यं वादिप्रवृत्तस्तु सर्वप्रमाणविप्रतिषिद्ध इति तन्निराकरणपनादरः त्रिय
ते लौकिकानि हि प्रमाणानि सदसत्त्वगोचराणि तैः खलु सत्सदिति गृह्यमाणं यथाभूतम
विपरीतं तत्त्वं व्यवस्थाप्यते असच्चासदिति गृह्यमाणं यथाभूतमविपरीतं तत्त्वं व्यवस्थाप्य
ते सदसतोश्च विचारासहत्वं व्यवस्थापयता सर्वप्रमाणविप्रतिषिद्धं व्यवस्थापितं भवति
तथा च सर्वप्रमाणविप्रतिषेधान्नेयं व्यवस्थोपपद्यते॥ यद्युच्येत तात्त्विकं नाम प्रमाणं
नो प्रमाणैर्मनेनाविचारेण व्युदस्यते न सांव्यावहारिकं। तथा च भिन्नविषयत्वान्न सर्वप्रमाण
विप्रतिषेध इत्यत आह नत्वेयं सर्वप्रमाणप्रसिद्धो लोकव्यवहारोन्यत्तत्त्वमनधिगम्य
शक्यते पह्नोतुं॥ प्रमाणानि हि स्वगोचरे प्रवर्त्तमानानि तत्त्वमिदमित्थमित्येवं प्रवर्त्तते अतात्त्वि
कत्वे तु तदेव रसान्यता वा प्रकारद्वयं तत्र्यं न उनः सांव्यवहारिकं नः प्रमाणं स्वरूपतात्त्वि
कमित्यव प्रवर्त्तते वाध्यं वा तात्त्विकत्वमेवोतदेवरविपरीततत्त्वोपदर्शनेन दर्शयेत॥ यथा

वा॰भा॰ ५१ ४२

शुक्तिकेयं न रजतं मरीचयो न तोयमेकश्चन्द्रो न चन्द्रद्वयमित्यादि तदिहापि समस्तप्रमाणगोचरवि
परीततत्त्वांतरव्यवस्थापनेनातात्विकत्वं प्रमाणानां बाध्यत्वेन दर्शनीयं न त्वव्यवस्थापिततत
त्त्वांतरेण प्रमाणानि शक्यानि बाधितुं विचारासहत्वेन तत्त्वांतरव्यवस्थापयद्बाधकमतात्ति
कत्वं प्रमाणानां दर्शयतीति चेत्किं पुनरिदं विचारासहत्वं यत्तत्त्वमभिमतं॥ किं तद्रूप
रमार्थितः सदादीनामन्यतमत्वेन वालेविचारं न सहते अथ विचारासहत्वं नानिरुक्तत्व
मेव तत्र परमार्थतः सदादीनामन्यतमस्य विचारं न सहत इति विप्रतिपन्नं न सहते चेन्न
सदादीनामन्यतमत्वं॥ अन्यतमत्वे तदपि न विचारं सहते अपनिरुक्तत्वे चेत्कयमन्यत
मत्तमव्यवस्थाप्यपराक्रममेवं न तु न चानिरुक्तत्वे तद्वतत्वे भावाभावानां तत्पासतिहितत्वाभावः
स्यात् सोपि च विचारं न सहत इत्युक्तं भवद्भिः। अपि च नारोपितं निषेधनीयं आरोपस्य
तत्त्वाधिष्ठानोदृष्टेः यथा शुक्तिकादिषु रजतादेर्न चेत्किंचिद्व्यवस्थितं तत्त्वमस्य कारिमिन्नारोपः॥
तस्मान्निष्प्रपंचे परमार्थसद्रूपाणि वाच्यप्रपंचात्मनारोप्येते तद्वत्तत्त्वव्यवस्थाप्यातात्त्वि

आरोपविबाधी आपतेग

कत्वेन समो व्यावहारिकत्वे प्रमाणलोकबाधकेनोपपाद्यत इति युक्तमुत्पश्यामः ॥ सर्वथाप्यनुपपत्तेश्च ॥
षि भवतो किं बहुना केन यथा यथा ग्रंथतोर्थतश्चायं वैनाशिकसमय इति ग्रंथतस्तावदयं नास्ति
ख नामिह चेपोषकमित्याख्यसाधुपदप्रयोगोर्थतश्चैनैरात्म्यमभ्युपेत्यालयविज्ञानं समस्त
वासनाधारमभ्युपगच्छन्नन्तरमात्मानमभ्युपैति ॥ एवं द्रव्याणि मतमभ्युपेत्य उत्पादव्ययतथा
गतानामनुत्पादकृत्स्निषैवैषाधर्मीणां धर्मताधर्मैक्यमिति तेति निष्यतामुपैती त्यादि व्यक्ति
ने तव्यमिति ॥ नैवास्मिन्नसंभवात् ॥ निरस्तो मुक्तो बद्धान्तो मुगतानां समयोऽविवक्षितो
नो समय इदानीं निरस्यते तत्समयमाह संक्षेपविस्तराभ्यां सकलवैशेषिकपदार्थीः समवतारा
त्तित्रसंक्षेपमाह संक्षेपतस्तु द्वावेव पदार्थाविति ॥ कोथात्मको जीवो जडवर्गस्त्वजीव इति
यथायोगं तयोर्जीवाजीवयोरिमम्परंप्रपंचमाचक्षाणेनमाह पंचास्तिकायात्मकमेति ॥ सर्वे
र्ं षामप्येषां अवांतरभेदानितिजीवास्तिकायपृथिव्यादिभेदेन षड्जीवनिकायास्तिकाय इति उलो
स्तिकायः षोढा पृथिव्यादीनि चत्वारि भूतानि स्थावरं जंगमं चेति ॥ धर्मास्तिकायः प्रवृत्त

वा०१२।२। नुमेयोऽधर्मास्तिकायः स्थितिलक्षणानुमेयः आकाशास्तिकायो द्विधा लोकाकाशोऽलोकाकाश
श्चेति तत्रोपर्युपरिस्थितानां लोकानामंतर्वर्त्ती लोकाकाशस्तेषामुपरि सोद्दृश्यानमलोकाका
५२ काशस्तत्र हि न लोकाः संति। तदेवं जीवाजीवपदार्थौ प्रपंचव्याख्यातौ॥ आश्रवसंवरनिर्ज श्री
रास्त्रयः पदार्थाः प्रवृत्तिलक्षणाः प्रपंच्यंते द्विधा प्रवृत्तिः सम्यक् मिथ्या च तत्र मिथ्याप्रवृत्ति
रास्रवः सम्यक्प्रवृत्तिस्तु संवरनिर्जरे आस्रावयति पुरुषं विषयेष्विति इंद्रियप्रवृत्तिरा
स्रवः॥ इंद्रियद्वारा हि पौरुषं ज्योतिर्विषयान् स्पृशद्रूपादिज्ञानरूपेण च परिणमत
इति॥ अन्ये तु कर्माण्यास्रवमाहुः तानि हि कर्त्तारमभिव्याप्य स्रवंतीति कर्त्तारमनुगच्छंती
त्यास्रवः। सेयं मिथ्याप्रवृत्तिरनर्थहेतुत्वात्। संवरनिर्जरे च सम्यक्प्रवृत्ती तत्र श
मदमादिरूपा प्रवृत्तिः संवरः सा ह्यास्रवस्रोतसो द्वारं संवृणोतीति संवर उच्यते निर्ज
रस्त्वनादिकालप्रवृत्तिकषायकलुषपुण्यापुण्यप्रहाणहेतुः तप्तशिलारोहणादिः सा हि
निःशेषं पुण्यापुण्यं सुखदुःखोपभोगेन जरयतीति निर्जरः॥ बंधोप्यष्टविधं कर्म तत्रघाति

कर्माणि च चतुर्विधं॥ तद्यथा ज्ञानावरणीयं दर्शनावरणीयं मोहनीयं अंतरायं चेति तथा चत्वार्यघाति
कर्माणि तद्यथा वेदनीयं नामिकं गोत्रिकमायुष्कं चेति। तत्र सम्यक्ज्ञानं मोक्षद्वारस्य यतं न
हि ज्ञानादृते मुक्तिसिद्धिरिति प्रसंगादिति विपर्यये ज्ञानावरणीयं कर्मोच्यते। आह तद्दर्शनाख्य
मोक्षमोहद्वारं इति ज्ञानदर्शनावरणीयं कर्म बहुषु विप्रतिषिद्धेषु तीर्थंकरैरपदर्शितेषु मोक्ष
मार्गेषु विशेषानवधारणं मोहनीयं कर्म सम्यक्मोक्षमार्गप्रवृत्तानां तद्विघ्नकरं विघ्नान
तरीयं कर्म तानीमानि श्रेयोहेतुत्वात् घातिकर्माण्युच्यते॥ अघातीनि कर्माणि॥
तद्यथा वेदनीयं कर्म शुभाशुभफलविपाकहेतुः तद्द्विविधोपि नानिःश्रेयसपरिपंथितत्वज्ञाना
विघातकत्वात्॥ शुभाशुभफलारंभकं वेदनीयं कर्म। नरगुरुनामिकं कर्म तद्धि शुभाशुभफल
स्वरूपावस्थाकलेवरादिकुदादिमारभते गोत्रिकं तु व्याकृतं ततोप्याप्यसाक्षिरूपेणावस्थितं
आयुष्कं तापुरुषापतिरूपपत्युत्पादनद्वारेण त्यायुष्कं तान्येतानि शुभाशुभफलाश्रयत्वा
द्घातीनि कर्माणि तदेतत्कर्माष्टकं पुरुषं बध्नाति तेन बंधः॥ विगलितसमस्तकर्मतो मोक्षः

बी.२।२। सानेस्यान्नावरणात्तानस्यस्तरवैव तानस्यात्मन उपदिदेशावस्याने मोत्तइत्येके अन्ये तद्धिग
४३ मनशीलो हि जीवो धर्माधर्मास्तिकायेन बद्धस्ताद्धि मोत्ताद्भूर्ध्वं गच्छत्येव समोत्त इति।।एते
मक्षपदर्शी जीवादयः सप्त हातान्तरप्रमेदैः रूपन्यस्ता।।तत्र सर्वत्रैमं सप्तभंगीनयं ना
मन्यायमवतारयंति।स्यादस्ति स्यान्नास्ति स्यादवक्तव्यः स्यादस्ति नास्ति च स्यादस्ति
चावक्तव्यः स्यान्नास्ति चावक्तव्यश्च स्यादस्ति नास्ति चावक्तव्यश्चेति।स्यात् शब्दः रव
ल्वयं निपातः तिङंतप्रतिरूपकः अनेकांतद्योती।।यथाहुः।।वाक्येष्वनेकांतद्योती ग
म्यप्रति विशेषणं स्यान्निपातोऽर्थयोगित्वात्तिङंतप्रतिरूपक इति।।यदि पुनरयमने
कांतद्योतकः स्याच्छब्दो न भवेत् स्यादस्तीति वाक्ये स्यात्पदमनर्थकं स्यात् ~~इति चेन्न~~
~~नैतिक्रम यदेव इति।।यदि पुनरयं~~ नैकांतद्योतकत्वे स्यादस्तीति द्योतक
कत्वे स्यादस्ति वचनं चेदस्तीति स्यात्पदात्कथंचिद्रूपोऽस्तीति स्यात्पदात्कथंचिद्रूपोऽस्तीत्
नेनानेकांतः प्रतीयत इति नानर्थक्यं तथा च स्याद्वादः सर्वथैकांतत्यागात् किंवृत्तचि

द्धिधेः। सप्तभंगनयापेक्षो हेयादेयविशेषवत्। किंवृत्ते प्रत्यये स्वल्पच्यपे चिन्निपातविधिनासर्वथै
कांतत्यागात्तस्मास्येकांतेषु योभंगः तत्रयोनयः तदपेक्षस्सन्हेयोपादेयभेदपस्याद्वादः कल्प वि
तो तथाहि पद्वस्त्वस्यैवेकांततः ततः सर्वथा सर्वदा सर्वत्र सर्वात्मना स्यैवेति नैकद्वीप्साजिहा
साम्यां के चित्कदाचित्कुत्रचित्कस्मिंश्चित्प्रवर्त्ततनिवर्त्ततवाप्राप्तस्याप्रापणीयत्वात्॥ हेयहाना त
नुपपत्तेश्चानेकांतपक्षेतुकंपंचित्केचित्कदाचित्कस्यचित्केनचित्कस्मिंश्चित्वेहानोपादानेप्रदा
वर्तावर्त्यतेतेनमेतत्सप्तभंगिन्यापेक्षूपयातेनएकास्मिन्वसंभवात्॥ विभजनेनस्यैकास्मिन
धार्मिर्णि परमार्थसताति परमापि सतोप्पुरूपत्वादसत्वादीनांधर्मोणांपरस्परपरिहारस्वरूपो
य णांसमावेशः संभवति एतदुक्तं भवति सत्यंपंदास्तिवक्तृतः तत्सर्वेषां सर्वदा सर्वत्र सर्वात्म
नानिर्वचनीयेनैकवेणास्येव ननास्ति यथाप्रतयागात्मायात्वि। चितत्पंचित्कदाचित्केनचि
दात्मनास्तीत्युच्यते यथा प्रपंचः तद्व्यवहारकेनतु परमार्थतः तस्य तद्विचारासहत्वात्।
नचमप्रपद्द मात्रेवास्तवत्वेव्यवस्थापयातिश्रुतिमनरूमरीचिकादिषु रजततोयादेरपिवा

वा०२।२
२५

स्त्ववत्वप्रसंगात्॥लौकिकानामबाध्येनतुतच्छवस्यापिदेहात्माभिमानस्याप्यबाध्येनतात्त्विक
त्वेसतिलोकायतमतापातेननास्तिकत्वप्रसंगात्पंडितरूपाणांतुदेहात्माभिमानस्यवि
चारतोबाध्यत्वंप्रपंचस्यापिश्रुतिनेकांतस्यतुल्यमिति॥अपिचसदसत्वयोःपरस्परविरु
द्धत्वेनसमुच्चयाभावेविकल्पेनचवस्तुनिविकल्पःसंभवतितस्मात्स्यादुक्तपुरुषोवेति
ज्ञानवत्समस्तत्वपंचत्वनिर्द्धारणस्यफलस्यानिर्द्धारयितुश्चप्रमातुःतन्निर्द्धारणस्यप्रमा
णस्यचतत्प्रमेयस्यचसमस्तत्वपंचत्वस्यसदसत्वसंशयेसाधुसमर्थितंतीर्थकरत्वम
षमेणात्मनोनिर्द्धारणस्यैकांतसत्वेसर्वत्रनानेकांतवादइत्याहएतेनसमस्तपदार्थाइति॥
शेषमतिरोहितार्थं॥॥एवंचात्माकार्त्स्न्यं एवंचेतिचेनसमुच्चयेपीतप्रतीतिशारीरस्यपरि
माणत्वेसात्मनोऽप्यकृत्स्नत्वंपरिच्छिन्नत्वंतथाचानित्यत्वंयेहिपरिच्छिन्नास्तेसर्वेऽनि
त्यायथाघटादयस्तथाचात्मेतितदेतदाहयथैवास्मिन्न्यस्मिञ्शरीरेति॥इदंचापरमकृत्स्न
त्वेनसन्निहितमित्याहयथाशरीराणामनवस्थितपरिमाणत्वादिति॥मनुष्यकायपरिमाणो

हि जीवो न हस्तिकायं [illegible] कृत्स्नं व्याप्तुमर्हत्यल्पत्वात् आत्मनः कृत्स्नशरीराव्यापि
त्वादेकदेशेऽस्थितत्वाच्च न शरीरपरिमाणत्वमिति॥ तथा हस्तिशरीरं परित्यज्य यदा पुत्तिकाशरीरे
भवति॥ तदा न तत्र कृत्स्नः पुत्तिकाशरीरे सम्मीयेतेत्येकदेशे मात्मनः सुगममन्यत्॥ चोद
यति स्याद्वादी तत्त्वं न तावदेव ज्ञातव्यं यथा हि प्रदीपो घटमहागृहमध्यवर्त्ती संकोचविकासवानेवं
३ जीवोऽपि पुत्तिकाहस्तिदेहयोरित्यपि॥ तदेतद्दृढकल्पं दूषयति॥ तेषां पुनरनंतानामिति॥ न ताव
त्प्रदीपोऽत्र निदर्शने भवितुमर्हति॥ अनित्यत्वप्रसंगात्॥ विशरारवो हि प्रदीपावयवाः प्रदीप
श्चावयवी प्रतिक्षणमुत्पत्तिनिरोधधर्मा तस्मादनित्यत्वात्तस्यनास्थिरो जीवस्तदवयवा
श्चाभ्युपेतव्याः तथा च विकल्पद्वयोऽत्र दूषणमिति॥ यच्च जीवावयवानामानंत्यमुदितं तदनु
पपन्नतरमित्यात्मापि च शरीरमात्रेति॥ अंशकाप्रविकसत्त्वांतरमावतारयति॥ अपपर्याये
णेति तत्राप्युच्यते॥ न च पर्यायादप्यविरोधो विकारादिरूपः कर्मीष्टकमतेतानावरणीया
दिकिं चान्यत् आत्मनोऽनित्यत्वाभ्युपगमे आगच्छतामपगच्छतां चावयवानामिष्यति॥ अ

वा॰ २।२।
६५

निरूपणेन चात्मत्वानाभावान्नापवर्ग इति भावः ॥ अत एव मादिदोषप्रसंगादिति आदिग्रहणात्
क्षितं दोषं ब्रूमः । किं चैते जीवावयवाः प्रत्येकं वा चेतयेरन् समूहे वा तेषां प्रत्येकं चैतन्ये बहूनां
चेतनानामेकाभिप्रायत्वनियमाभावात् कदाचिद्विरुद्धक्रियत्वे शरीरमुन्मथ्येत समू
हे चैतन्ये तु हस्तिशरीरस्य पुत्तिकादेहत्वे छिन्नावयवशेषाज्जीवो न चेतयेत ॥ विगलि
तबहुसमूहितया समूहस्याभावात् पुत्तिकाशरीर इति ॥ अथ चेति ॥ पूर्वसूत्रप्रसंजि
तां जीवानित्यतां वोढुं वक्ष्यंतानानित्यता माशंकयेदं सूत्रं ॥ न च पर्यायादप्यविरोधो विका
रादिभ्यः ॥ न च पर्यायात् परिमाणानवस्थानेपि संतानाभ्युपगमे नात्मनो नित्यत्वा
विरोधो बंधमोक्षयोः कुतः परिणामादिदोषेभ्यः संतानस्य वस्तुत्वे परिणामवत्त्वेन
श्चर्मवदनित्यत्वादिदोषप्रसंगो वस्तुत्वे चादिग्रहणात् चिततौ नैरात्म्यापत्तिदोषप्र
संग इति विसिचोविवसनाः ॥ अंत्यावस्थितेश्चोभयनित्यत्वादविशेषः ॥ एवं हि मु
क्तावस्थाभावि जीवपरिमाणं नित्यं भवेत् पर्यभत्वान्न भवेत् ॥ आप्रभवा भाविनामनि

सत्वोत्पघटादीनां कार्यत्वाभावात्वा न भवेयुरिदि प्रागप्यासीत । न च परिमाणेन तावतो ऽवच्छेदः पूर्वं भवि
तुमर्हति ॥ तस्मादेतत्समेव परिमाणं पूर्वमप्यासीदित्यभेदः तथा चैकशरीरपरिमाणत्वेनास्यात
नोपचिताचितशरीरप्राप्तिः ~~शरीरप्राप्ति~~ शरीरपरिमाणत्वाभ्युपगमव्याघातादिति ॥ अत्र च
उभयोः परिमाणयोर्नित्यत्वप्रसंगादिति योजना । एकशरीरपरिमाणत्वेऽपि चेदीप्यते द्वितीये
तु व्याख्याने उभयोरवस्थयोरिति योजना । एकशरीरपरिमाणतानदीप्याएवपरिमाणता
मात्रमणुर्महत्त्वेति विवेकः ॥ पत्पुरसामंजस्यात ॥ अविशेषेणेश्वरकारणवादेनेन नि
षिध्यातइति भ्रमनिवृत्त्यर्थमाह केवलेति ॥ सांख्ययोगव्यपाश्रयाहिरण्यगर्भपतं
जलिप्रभृतयः प्रधानमुक्तेश्वरक्तिः पुरुषः । प्रत्ययानुपश्यः सवनानाक्लेशकर्मविपाका श्री
शयैरपरामृष्टः पुरुषविशेष ईश्वरः प्रधानपुरुषयोस्वाम्यन्यः माहेश्वरास्तु त्वरः शैवाः
पाशुपताः कारुकसिद्धांतिनः कापालिकाश्चेति ॥ चत्वारोऽप्यमी महेश्वरप्रणीतसिद्धांतानु
गामितया माहेश्वराः ॥ कारणमीश्वरः प्रधानकार्यं माध्यानिके महदादि प्रयोगोऽयंकारादिध्या

नधारणादिर्विधिस्त्रिषवणस्नानादिर्गृहवर्णीवसानो दुःखान्तो मोक्षः। पशवः आत्मानः तेषां
पाशो बन्धनं तद्विमोक्षो दुःखान्तः एष तेषामभिसंधिः॥ चेतनस्य खल्वधिष्ठातुः कुम्भकारा
देः कुम्भादिकार्ये निमित्तकारणत्वमात्रं न तूपादानत्वमिति तस्मादिहापीश्वरोऽधिष्ठा
ता जगत्कारणानां निमित्तमेव न तूपादानमप्येवमस्याधिष्ठातृत्वाधिष्ठेयताविरोधादि
ति प्राप्तमेवं प्राप्ते उच्यते॥ पत्युरसामंजस्यात् इदमत्राकूतं। ईश्वरस्य निमित्तकारणत्व
मात्रत्वमागमाद्गृह्यते प्रमाणान्तराद्वा प्रमाणान्तरमप्यनुमानमर्थापत्तिर्वा न तावदाग
मात्तस्य निमित्तप्रकृतिकारणप्रतिपादनपरत्वादित्यसकृदावेदिते। तस्मादनेना
स्मिन्नर्थे प्रमाणान्तरमास्थेयं। तत्रानुमानं तावन्न संभवति। तद्धि दृष्टानुसारेण वर्त्ति
ते तदनुसारेण वा सामंजस्यं तदा हि हीनमध्यमेति॥ एतदुक्तं भवत्यागमाद्धीश्व
रासिद्धौ न दृष्टमनुसर्त्तव्यं न हि स्वर्गापूर्वदेवतादिष्वागमादेवागम्यमानेषु किंचिदृक्षि
दृष्टं न ह्यागमो दृष्टसाधर्म्यात्प्रवर्त्तते तेन ह्यतिसिद्धार्थमदृष्टानि दृष्टान्तरविपरीत

प्रवर्त्त्य

स्वभावानिमृतवहूनि अपि कल्प्यमानानि न लोहलेख्यतामावहंति प्रमाणत्वात् ॥ यत्तु तत्र कंपचिदृष्टानुमा
रः क्रियते सम्मुहृद्भावमात्रेण अप्रमाणानपेक्षमनुमानेन दृष्टसाधर्म्येण प्रवर्त्तमानं दृष्टविपर्ययतु
बाद्धपि बिभेतितरामिति प्राणिकर्मापेक्षत्वाद्दोष इति चेत् न कुतः कर्मेश्वरयोर्मिथः प्रवर्त्तीय
त्वे इतरेतराश्रयदोषप्रसंगात् अपमर्षः यदीश्वरः करुणापराधीनो वीतरागः स्वतः प्राणि
नः कष्टपे कर्मण्येपि न वर्त्तयेत् तच्चोत्पन्नमपि नाधितिष्ठेत् तावन्मात्रेण प्राणिनो दुःखानुत्पाद
नो हीश्वराधीना जंतवः स्वातंत्र्येण कष्टपं कर्म कर्त्तुमर्हन्ति तदनधिष्ठितं वा कष्टपं कर्म स्वफले
प्रणेतुं समुत्सहते । तस्मात्स्वातंत्र्योपीश्वरः कर्मार्थः प्रवर्त्तते इति दृष्टविपरीतं कल्पनीयं । तथा
चापमपरो दोषः उस्यापरिस्फोटः इतरेतराश्रया प्रसज्येत कर्मणीश्वरः प्रवर्त्तनीय ईश्व
रेण च कर्मणि तत्संके तेनाक्षन्यादित्वादिति चेत्पूर्वेण कर्मणेश्वरः संप्रतितने कर्मणि प्रवर्त्त्यते ते
नेश्वरेण संप्रतितनं कर्म स्वकार्ये प्रवर्त्त्यत इति । निराकरोति न वर्त्तमानकालवदिति । अथ
एवं कर्मकष्पमीश्वरप्रवर्त्तितमीश्वरप्रवर्त्तनं तद्द्वारेणं कार्यं करोति । तत्रापि प्रवर्त्तितमीश्वरेण

वो॰रा॰रा॰ प्रयत्नेतरकर्मप्रवृत्तिरिति नेत्यर्थः पक्षधर्मपरास्तोषः ॥ बहुष्वास्ताम् संधोनीयते नो धांतरेण तथैव हाधि
४८ भावप्रियप्रवृत्त्यावितिरः कथं प्रवर्त्तयेदित्यर्थः ॥ अपि च नैयायिकानामीश्वरस्यानिर्दोषत्वं स्वस
मयसिद्धमित्याह अपि चेति ॥ अस्माकं तु नायं समय इति भावः ॥ ननु कारुण्यादपि प्रवर्त्तमानो
ज्ञेनो दृश्यते ॥ न च कारणं हेतुः इत्यत आह स्वार्थप्रयुक्त एवेति करुणया हि परस्य दुःखं भवति तेन
९ तत्प्रहाणाय प्रवर्त्तत इति कोऽन्यः कोऽपि स्वार्थप्रयुक्त एव प्रवर्त्तत इति ॥ ननु स्वार्थप्रयुक्तः प्रवर्त्ती
तामेवमपि कोऽदोषः इत्यत आह स्वार्थत्वादीश्वरस्येति ॥ आप्तत्वादित्यर्थः ॥ पुरुषस्य चैत
सीन्याभ्युपगमान्नेवास्ती प्रवृत्तिरिति ॥ अपरमपि दृष्टान्तं सारेण दूषणमाह सर्वे धानुपप
तेः ॥ ऽशोहि सावयवानाम सर्वगतानां च संयोगः ॥ प्राप्तिपूर्विका हि प्राप्तिः संयोगो न सर्वग
तानां संभवति अप्राप्तेरभावात् निरवयवत्वाच्च अव्याप्यवृत्तिता हि संयोगस्य स्वभावो न च
निरवयवेषु अव्याप्यवृत्तिता संयोगस्य संभवतीत्युक्ते तस्मात् अव्याप्यवृत्तिताया संयोगव्या
पिकायानिवृत्ते तस्मिन् व्याप्यस्य संयोगस्यापि निवृत्तिरिति भावः ॥ नापि समवायलक्षणः सहयुतसि

सोनामाधेयाधारभूतानांइहप्रत्ययहेतुःसंबंधइत्यभ्युपेयते।नचप्रधानपुरुषेश्वराणांमिथो
स्याधार्याधारभावइत्यर्थः॥नापियोग्यतालक्षणःकार्यगम्यःसंबंधइत्याहनाप्यन्यइति॥न
हिप्रधानस्यमहदहंकारादिकारणत्वमप्यापिसिद्धमितिशंकते।ब्रह्मवादिनइति॥निराकरोति
नकुतस्तस्यमतेअनिर्वचनीयतादात्म्यलक्षणसंबंधोपपत्तेः॥अपिचेति॥आगमोहिप्रव
त्तिप्रतिनदृष्टंतमपेक्षतेदृष्टपूर्वेतद्विरुद्धेचप्रवर्त्तितुमसमर्थः॥अनुमानेतुदृष्टानुसारितै
वंविधेप्रवर्त्तितुमर्हतीतिशंकतेपरस्यापीति॥परिहरतिनेति॥अस्माकंतुईश्वरागमयोरनादि
त्वादीश्वरयोनित्वेप्यागमस्यनदोषइतिभावः॥अधिष्ठानानुपपत्तेश्च॥यथास्पर्शीनमनुमा
ती नेप्रवर्त्ततेनालौकिकार्थविषयंइहापिनप्रत्यक्षगोचरत्वंवस्तुगम्यंअन्यत्र॥करणवच्चेन्नभोगादि
भ्यः॥रूपादिहीनमित्यनुद्भूतरूपादीत्यर्थः॥रूपादिहीनेकरणाधिष्ठानेपुरुषस्यस्व
भोगाद्वारेवदृष्टंनान्यत्रनहिवास्यंकुठाराद्यपरिदृष्टंव्यापारवन्नोपलभ्यते॥तस्माद्रूपा
दिहीनेकरणंव्यापारयतईश्वरस्यभोगादिप्रसक्तेः॥तथाचानीश्वरत्वमितिभावः॥करणं

वे०२।२।
४९

तस्मादन्यथेति पूर्वमधिष्ठितिरधिष्ठानं ॥ इदानीं त्वधिष्ठानं भोगायतनं शरीरमुक्तं ॥ तथा भो
गादिप्रसंगेनानीश्वरत्वं पूर्वमापादितं संप्रति तु शरीरित्वेन भोगादिप्रसंगादनीश्वरत्वमु
क्तमिति विशेषः ॥ अंतवत्त्वमसर्वज्ञता वा ॥ अपि च सर्वत्रानुमाने प्रमाणे यतः प्रधानपुरुषे
श्वराणामपि संख्याभेदवत्त्वमंतवत्त्वं च द्रव्यत्वात् संख्यावत्त्वे सति प्रमेयत्वाद्वानुमातव्यं ॥
ततश्चांतवत्त्वमसर्वज्ञता वा ॥ अस्माकं त्वागमगम्येऽर्थे तद्बाधितविषयतया नानुमानं प्रभव
तीति भावः ॥ स्वरूपपरिमाणमपि । यस्य यादृशमणु महत् परममहद्दीर्घं ह्रस्वं चेति ॥ अयमा
देषदोष इत्युत्तरो विकल्पः ॥ यस्यांतो नास्ति तस्यांतवत्त्वाग्रहणमसर्वज्ञतामापादयेत् ॥ यस्य
त्वेत एव नास्ति तस्य तदग्रहणं नासर्वज्ञतामावहति न हि शशविषाणाज्ञानादज्ञो भवेतीति भा
वः ॥ परिहरति तत इति ॥ आगमानपेक्षस्यानुमानमेषामंतवत्त्वमवगमयतीत्युक्तं ॥ उत्पत्त्य
संभवात् ॥ अन्यत्र वेदाविसंवादात् पंचरात्रैकदेशविसंवादः स निरस्यते तमंशमाह यत्पुनरिदमु
च्यते वासुदेवात्संकर्षण इति जीवस्य हि कारणवत्त्वे सत्यनित्यत्वं अनित्यत्वे परलोकिनो भा

व

वात् । ततश्च परलोकाभावः ततश्च स्वर्गनरकापवर्गाभावापत्तेर्नास्तिक्यमित्यर्थः ॥ अनुपपन्ना च
जीवस्योत्पत्तिरित्याह प्रतिषेधाच्चेति ॥ न च कर्तुः करणं । यद्यप्यनेकशिल्पपर्यवदातः परशुं कृ
त्वा तेन पत्राणि छिनत्ति यद्यपि च सम्पत्तेर्नेन्द्रियाण्यात्ममनःसन्निकर्षद्वारेण ज्ञानकरणमुपादायात्मा
पि विजानाति तथापि संकर्षणोऽकरणः कथं प्रद्युम्नाख्यं मनः करणं कुर्यात् ॥ अकरणस्य च कर
णसामर्थ्ये कृते करणनिर्माणेनाकरणादेव निखिलकार्यसिद्धिरिति भावः ॥ विज्ञानादिभावे वा
तदप्रतिषेधः ॥ वासुदेवा एवैते संकर्षणादयो निर्दोषा अविद्यादिदोषरहिताः निरधिष्ठाना निरुपा
दाना अत एव निरवद्या अनित्यत्वादिरहिताः । तस्मादुत्पत्त्यसंभवो न गुणत्वान्न दोष इत्यर्थः ॥
अत्रोच्यते ॥ एवमपीति ॥ मा भूदभ्युपगमेन दोषः प्रकारान्तरेण त्वयमेव दोषः ॥ प्रश्नपूर्वकं प्रका
रान्तरमाह कथं यदि तावदिति न तावदेते परस्परं भिन्ना ईश्वराः परस्परव्याहतेच्छा भवितुमर्हन्ति
व्याहतकामत्वे च कार्यानुत्पादात् ॥ अव्याहतकामत्वे वा प्रत्येकमीश्वरत्वे एकेनैव [illegible] सानायाः कृतत्वा
दानर्थक्यं सम्मितरेषां संभूप वेशनायां परिशुद्धानेकस्त्रिष्वीश्वरः स्यात् तत्सिद्धं तद्धानिश्च भगवतो नेवे

स्यांत्र

२

वात् । ततश्च परलोकाभावः ततश्च स्वर्गनरकापवर्गाभावापत्तेर्नास्तिकत्वमित्यर्थः ॥ अनुपपन्नाच
जीवस्योत्पत्तिरित्याह प्रतिषेधाच्चेति ॥ न च कर्तुः करणं । यद्यप्यनेकशिल्पपर्यवदातः परशुं वृ
त्वातेन पलाशं छिनत्ति यद्यपि च स पतले नेन्द्रियाणामात्ममनःसन्निकर्षद्वारेण ज्ञानकारणमुपादायात्मा
र्थं विज्ञानाति तथापि संकर्षणः करणं कथं प्रद्युम्नाख्यं मनःकरणं कुर्यात् ॥ अकरणस्य चकर
णसामर्थ्ये कृतं करणानि निर्माणे नाकरणादेव निखिलकार्यसिद्धिरिति भावः ॥ विज्ञानादिभावे वा
तत्प्रतिषेधः ॥ वासुदेवा एवैते संकर्षणादयो निर्दोषा अविद्यादिदोषरहिताः निरधिष्ठानानिरूपा
दाना अतएव निरवद्याः अनित्यत्वादिरहिताः । तस्मादुत्पत्त्यसंभवो न गुणत्वान्नदोष इत्यर्थः ॥
अत्रोच्यते ॥ एवमपीति ॥ मा भूदभ्युपगमे न दोषः प्रकारान्तरेणत्वयमेव दोषः ॥ प्रश्नपूर्वकं प्रका
रान्तरमाह कथं यदि तावदिति न तावदेते परस्परं भिन्ना ईश्वराः परस्परव्याहतेच्छा भवितमर्हन्ति
व्याहतकामत्वे च कार्यानुत्पादात् ॥ अव्याहतकामत्वे वाप्रत्येकमीश्वरत्वे एकेनैव सानायाः कृतत्वा
दानर्थक्यं सम्मितरेषां संभपवेशनायो परिशुद्धानेकत्रिनिःश्वरः स्यात् तत्सिद्धान्तहानिश्च भगवतो नैवे

वा॰।२।२। कोऽसौ वासुदेवः परमार्थतत्त्वमित्यभ्युपगमात्तस्मादकल्याणतरमास्थेयं॥ तत्र चोत्पत्त्यसंभवो दोषइ
४५ त्यापाद्य वाक्यान्तरमुपन्यस्योत्पत्त्यसंभवेनापाकरोति अपायमाभप्राप इति सुगममन्
त॥ विप्रतिषेधाच्च॥४५॥ गुणगुणिनः स्वत्वात्मनो ज्ञानादीन्गुणान्भेदेनोक्त्वा पुनरभेदं ब्रूते।
आत्मान एवैते भगवन्तो वासुदेवा इति आदिग्रहणेन प्रद्युम्नादिरूपेण मनोहंकारलक्षण
तयात्मनो भेदमभिधायात्मान एवैत इति तद्विरुद्धाभेदाभिधानमपरं संगृहीतं वेदवि
प्रतिषेधो व्याख्यातः॥ इति श्रीमच्छारीरकमीमांसाभाष्ये श्रीमच्छंकरभगवत्पादकृतौ द्विती
यस्य द्वितीयः पादः समाप्तः॥ वंसीधरेण लिखितं॥ ॥ २ २ २

वाचस्पति द्वितीयाध्यायतृतीयपादारंभः

वी॰ र॰ वृ॰

१

ॐ श्रीगणेशाय नमः ॥ न वियदश्रुतेः ॥ पूर्वं प्रमाणान्तरविरोधः श्रुतेर्निराकृतः संप्रति तु श्रुतीनामेव
परस्परविरोधो निराक्रियते तत्र सृष्टिश्रुतीनां परस्परविरोधमात्र वेदान्तेषु तत्र तत्रेति ॥ श्रुतिविप्र
तिषेधाच्च परपक्षाणामनपेक्षत्वेऽपि तं तद्वत्स्वपक्षस्य श्रुतिविप्रतिषेधादिति ॥ तदपि निर्मलत्व
मपामाकाशविनिवृत्त्यापि तत्प्रतिपादनं तस्य फलं स्वपक्षस्य जगतो ब्रह्मकारणत्वस्यानपेक्षत्व
शंकानिवृत्तिः ॥ इह हि पूर्वपक्षे श्रुतीनामपि विरोधः प्रतिपाद्यते सिद्धान्ते त्वविरोधः तत्रासिद्धा
न्तैकदेशिनो वचनेन वियदश्रुतेरिति ॥ तस्यायमभिसंधिः ॥ यद्यपि तैत्तिरीयके वियत उ
त्पत्तिरश्रुता तथापि तस्याः प्रमाणान्तरविरोधात बहुश्रुतिविरोधाच्च गौणत्वे तथाच वियतो
नित्यत्वात्तेजः प्रथमत्व एव सर्गस्य तथा च न विरोधः श्रुतीनामिति ॥ तदिदमुक्तं प्रथमं तावदाका
शमाश्रित्य चिंत्यते किमस्योत्पत्तिरस्त्युत नास्तीति ॥ यदि नास्ति न श्रुतिविरोधाशंका ॥ अथा
स्ति ततः श्रुतिविरोध इति तत्परिहाराय प्रवृत्तो तस्मादस्य पक्षस्योत्पत्तिः ॥ तत्र पूर्वपक्षसूत्रं ॥
न वियत् ॥ तैत्तिरीये हि सर्गप्रकरणे केवलस्याकाशस्यैव प्रथमः सर्गः श्रूयते । छान्दोग्ये च ते

त र

= स्वाध्यवहितत्वं वृत्तिसर्गाश्रितत्वे

वलस्यतेजसः प्रथमः सर्गः॥ न च अत्यंतरानुरोधेनासहायस्याधिगतस्यापि सहायताक
ल्पने युक्ता असहायत्वावगमविरोधात्॥ अतस्तिरूपि खल्वत्यंतं कल्पतेन तद्विघात
पविहन्यते वा असहायत्वं अतं कल्पितेन सहायत्वेन॥ न च परस्परानपेक्षाणां व्रीहियव
वद्विकल्पोऽनुष्ठानं हि विकल्प्यते न वस्तु न हि स्थाणुपुरुषविकल्पो वस्तूनि प्रतिष्ठां ल
भते न च सर्गभेदेन व्यवस्थोपपद्यते सा प्रतिकल्पसर्गं वक्तृतया सर्वस्यापि तथात्वात् न ख
ल्विह सर्गे हीरण्यगर्भो जायते सर्गान्तरे तु रुद्रः हीरण्यगर्भो भवति। तस्मात्सर्गभेदतः पर ।ति
स्परविरोधिनो नानाविधार्थे प्रमाणं भवितुमर्हन्तीति पूर्वपक्षः सिद्धान्तैकदेशी स्वत्रैल
स्याभिप्रायमाविष्करोति॥ गौणत्वसंभवात्॥ प्रमाणान्तरविरोधेन वहु अत्यंतरविरोधे
न चानीशस्योत्पत्त्यसंभवात् गौणत्वे वाकाशोत्पत्तिश्रुतिरिव विरोध इत्यर्थः। प्रमाणान्तर
विरोधमाह न त्वकाशस्येति समवायिनिमित्तकारणाभावो हि कापि स्यादुत्पत्तिर्नियतातदभा
वेन भवितुमर्हति धूम इव धूमध्वजाभावे तस्मात् सकारणमाकाशं नित्यमिति॥ अपि च ये उत्प

धूम

वी॰ र॰ रु॰ ध्वंसे तेषां प्रागुत्पत्तेरनुभवार्थक्रियेनोपलभ्येते उत्पन्नस्य च द्वेषेपि तेजःप्रभृतीनां नवाता
२ दृष्टो विशेष उत्पादानुत्पादयोरक्षितस्यान्नोत्पद्यत इत्याह उत्पन्नमंतानेति प्रकाशानस्मकोपि
घटपटादिगोचरः॥ प्राण्यादिवैधर्म्याच्चेति आदिग्रहणेन द्रव्यत्वे सत्यस्पर्शत्वात् आत्मवत्
नित्यमाकाशमितिग्रहीतं आरण्ये नाकाशे श्रितिवेदध्येकस्याकाशस्योपाधिके बहुत्वं॥ तदेव
प्रमाणांतरविरोधेन गौणत्वमस्तु आत्मांतरविरोधेनापि गौणत्वमाह प्रमाणा॥ स्नगमे॥
स्याद्वैकस्यबहुत्वमाहव्यवत॥ यद्यस्यानेकेषु गौणपदार्थस्य तद्गुणोपचिन्हरूपदर्शिचेदेपचारिकं सं
भवास्तभवाभ्यामित्यविरोधः॥ चोद्य दूषकं कोति। यप्यमेति॥ अप्यस्य चोद्यपरिहरति एकमेवे
तिनावदिति॥ कुलं गृहं आत्मत्राणि पात्राणि घटा ना वाहीनि॥ आत्मेति द्वि भवधारणेन सर्वे
विषयमित्यर्थः॥ उपपत्यंतरमाह नचनभस्वापीति॥ अपिरभ्युपगमे। यदि सविपेद्रो तथाप्य
दोषइत्यर्थः॥ नचप्राउत्पत्तेर्न्त्रगतइतिदोषः। द्वितीयंचोद्यमपाकरोति अतएवचबहुत्वविदा
नेनेति॥ लक्षणैन्यत्वाभावेनाकाशस्यबहुत्वेनान्यत्वादिति॥ अपिचाव्यातिरिक्तोदेशका

लेन कार्यं ब्रह्मणा चैव ब्रह्मकार्यैक्यं तदभिन्नत्वस्वभावे रतः क्षीरकुंभप्रभृतिसकलतिपयपयोविंदुव
द्दुग्धेनैत अकार्यं च विज्ञाते न भोविदितं भवतीत्याह अपि च सर्वं कार्यमुत्पद्यमानमिति ॥ एवंविसि
द्धं तेन देशिकस्ते प्राह इदमाह प्रतिज्ञातानिव्यतिरेकादृष्टेभ्यः ॥ ब्रह्मविवर्त्तात्मतया जगत
स्तद्विकारस्य वस्तुतो ब्रह्मणोऽभेदे ब्रह्मणि ज्ञाते ज्ञानमुपपद्यते । नहि जगत्तत्वे ब्रह्मणोऽन्यत
तस्माद्कार्यमपि तद्धि वर्त्ततया तद्विकारः सर्वज्ञानेन ज्ञातो भवति नान्यथा । अविका
रत्वेनतु तत्त्वतो तरेन ब्रह्मणि विदिते विदितं भवति भिन्नयोर्मूलत्वरणान्यत्वाभावे पि देशकाला
भेदेपि नान्यतरज्ञाने नान्यतरज्ञानं भवति ॥ नहि क्षीरस्य पूर्णे कुंभे क्षीरे गृहत्वमात्रेस त्वपि
पयोविंदुषु पापः तत्प्रतिभासमसुक्ति विज्ञाने । तस्मादन्यते क्षीरे विदिते विदिता इति प्रतिज्ञा हष्टा
न्तमवयानुपरोधापवियत उपपत्तिनामेना पाभ्युपेयते ॥ तदेवं सिद्धांते तदेशेन दूषिते प्रवं
पक्षी स्वपक्षे विशेषमाह नर्तं हाशितेः ॥ अत एव विवर्त्तनुतादिति सिद्धांतसारमाह नैष दोषः तेजः
सर्गस्य तैत्तिरीयक इति अतलोरन्यथोपपद्यत इति दुर्बलानन्तसहायतेजः प्रथममवगम्य

मयो ... पद्यमानानुपपद्यमानयोरन्यथानुपपद्यमानावलवती ... श्रुतिः ॥

वा॰ अ॰ २।२।

२

सर्गे

मानेमनस्त्वापत्तेर्न विरुध्यत इत्युक्तमत आह न तावदयं श्रुतिस्तेजोजनिप्रधानेति संसर्गश्रोतो मेदस्त्व
पि॥ स च श्रुत्यंतरेण विरोधेन बाध्यते जघन्यत्वात् न च तेजः प्रकृत्व सर्गे संसर्गैव स्तनहत्वापत्त
नयस्य श्रौतं किंतु व्यतिरेकलभ्यं न च श्रुतेन तदपवाधने श्रुतस्य तेजः सर्गस्यानुपपत्तिः॥
तदिदमुक्तं तेजः जनिप्रधानेति॥ स्यादेतत् पचेकं वाक्यमनेकार्थं न भवत्येकस्य व्यापरद्वय
संभवात् हेतमोः कथमेकस्य क्त्वाश्रुतेरनेकव्यापारत्वं विरुध्यत इत्यत आह क्त्वाप्रत्ययेकोऽपीति
हेतु प्रयोगाधीनावधारणं शब्दसामर्थ्यं न बाध्यते तस्य शब्दस्य क्रमाक्रमाभ्यामनेकत्वार्थव्यापा ना
रोऽहः एकस्तु क्रमाक्रमाभ्यामेकस्यापि कर्तुरनेकव्यापारत्वमित्यर्थः॥ न चास्मिन्नर्थे एकस्य
वाक्यस्य व्यापारोऽपि तु भिन्नानां वाक्यानामित्याह न चाश्रयामिभिरिति॥ मुख्यमेव॥ चोदयति॥ न
नुरामविधानार्थमिति॥ यस्य परः शब्दः स शब्दार्थो न चैवमत्र परोऽपि तु शब्दपर इत्यर्थः॥ परिहर
ति नहि तेजः प्राप्यस्यानुरोधेनेति॥ मुख्यत्वादिति लोके क्रमस्य स्वतंत्र प्रधानपदार्थविधेय धात्वर्थ
गोपुनरित्यर्थः॥ विलंबलोकितन्यायेन विपरकंतार्थवादेन प्रत्याहक्याप्येव चैकं दोषपदमिति॥

यत्तु नरत्वाद्यप्रतिसौपचारदं नं रूतं तद्दूषयति यज्ञोऽस्मीति॥ इदं तावत् नुरूपत्वाद्दोषीति तस्य तस्य यच्च प्रवृ
त्तिनिमित्ताकारस्वरूपत्वाद्द्वेष्टीति तस्यापि तथाभावः॥ अपि च भ्रांतिस्थले चैतन्यचैतन्ये तद्वितीय प्र
तीतौ तद्वीरबुद्धिवत्। औपचारिके वाक्ये हि सामानाधिकरण्यं इति वत् तत्र च न तावत् भ्रांतस्थित्याह द्वितीये
रके न्याये नेति। भ्रांतौ विप्रलंभादिप्रायस्य च पुरुषधर्मत्वादपौरुषेये तदसंभवइत्यर्थः॥ नाप्यौप
चारिकमित्याह नान्वारणेन वेपर्य्यमिति॥ काममुपचारादेकत्वं वत्तु समवधारणं द्वितीयपदे तु नोपपद्य
ते नहि माणवके सिंहत्वमुपचर्य्यते नासिंहादेस्सिंहत्वम्नागपि मानावधारणं इति वदंति लौकिकाः॥
तस्माद्वास्तवमेकत्वं जगतोऽविवादितं स्यान्नत्वौपचारिके। अस्माके नित्यं यस्य सर्पस्य भ
वति न तत्त्वतमपि प्राणे नैवौपचारिकत्वमित्यर्थः॥ ननु तस्य कायोपचयेनेति॥ निःशेषवचनतः स्व
रस्वतः सर्वशब्दो नासति शक्त्या तत्र रविरोधे एकदेशविषयो युज्यत इत्यर्थः॥ आकाशस्योत्प
त्तौ श्रुतिमानंतरविरोधमुक्तं मनुभाष्य तस्य श्रुतिमानंतरस्वमानान्तरविरोधेनाप्रमाणं भ्रांतस्य
नगौणत्वापादनं साम्यमित्याह यावद्विकारं तु विभागो लोकवत्॥ यदेव प्रयोगस्याकाशादिभ्यो

बो॰र॰३॰

४

आत्मेति अविद्यातत्संबंधादीनामुपलक्षणं। तेन न तत्र व्यभिचारः। शशविषाणादौ व्यभिचारवारणाय प्रविभक्तत्वादिति सद्रूपत्वे इत्यपि

लम्बनः परमाणोर्वेति कारकः॥ आत्मानात्मत्वेनेति विभक्तत्वात् घटशरावोदंचनवदिति॥ सर्वकार्यनि
रात्मकं इति निरुपादानेस्वादित्यर्थः॥ स्वतन्त्रवादे अनिराकृतः स्वयमेव स्वात्मोपन्यस्य स्वरूपमस
तः सन्मात्रापेक्षितेति॥ उपपादितं च तन्निराकरणमधस्तादिति॥ आत्मवादे वोपादानत्वादेरात्मनः
सत्तामात्रेणैव निराकरणशंकानुपपत्तिः॥ एतदुक्तं भवति सोपादानं चेत्कार्यं तत्तत्कार्यत्वेनैवोपादानं
युक्तं तस्येवोपादानत्वेन श्रुतेरुपादानान्तरकल्पनानुपपत्तेरिति॥ स्यादेतत्तान्य सत्वात्कोपा
दानस्य जगतः तस्य तदुपादानान्तरस्याप्युपक्षणमप्यनवस्थितेरत आह नत्वात्त्वं तु
कस्यचिदुपादानान्तरस्यापेक्षणं कुतः स्वयंसिद्धत्वात् सत्तावा प्रकाशो वास्य स्वयं सिद्धो॥ तत्र
कारणाभिमतायाः सिद्धसत्तावदनागंतुकत्वमाह न पोत्मात्मनइति॥ उपपादितमेतदधस्तात्प्रति
पदीसर्पिके हृत्तानास्यदत्वादेकदापि नात्मापराधीनप्रकाशः स्वाधीनप्रकाशात्मप्रमाणादयोऽत
एव श्रुतिस्तमेव भांतमनुभातिसर्वं तस्य भासा सर्वमिदं विभातीति॥ न चैतद्दृशास्यानिराकरणं
संभवतीति॥ निराकरणमपि हि तदधीनात्मलाभं तादृशं कुंठं नोदेतुमर्हतीत्यर्थः॥ सत्तायां

क

ह स्थु
नागन्तुकत्वमस्याहतयामेवेशनीजानामीतिप्रमाप्रमाणप्रमेयानांवर्तमानातीतानागतत्वे
पिप्रमातुःसदावर्तमानत्वेनानुभवात् अपितस्वभावस्यनागन्तुकत्वंस्वत्वेचैकात्म्यावच्छेदेन
हिआगन्तुकत्वेव्याप्तंतत्प्रमातुःसदावर्तमानात्वाद्वर्तमानत्वमागन्तुकत्वंस्वव्याप्यमा
दायनिवर्ततइति॥अन्यथाभवत्वपिज्ञातव्यइतिप्रकृतिप्रत्ययाभ्यांज्ञानेऽयथे
रन्यथाभावोदर्शितः॥ननुजीवतःप्रमातुर्मोक्षेऽन्यथाभावोमातस्यतुभविष्यती
त्यतआहतथाभस्मीभवत्यपीति॥एवंचलुसत्वभावमनुभवसिद्धंतस्यानिर्व
चनीयत्वमन्यतोबाधकाभावेऽवसातव्यं॥बाधकंचघटादीनांस्वभावाद्धिचलत्वंप्र
माणेषुपनीतं।यस्यतुनतदस्त्यात्मनोनतस्यतत्कल्पनेयुक्तमबाधितानुभवसिद्धस्य
तत्स्वभावस्यानिर्वचनीयत्वकल्पनाप्रमाणाभावात्॥इदिदमुक्तंसंभावयितुंश
क्यमिति॥तदनेनप्रबंधेनप्रत्यनुमानेनाकाशानुमत्यनुमानेदूषयित्वाअनैकांति
कत्वेनापिदूषयति॥यत्तेसमानजातीयमिति॥नाप्यनेकमेवोपादानमुपादेयमा

२।३।
वा॰
५

रम्भते॥ यत्र हि क्षीरं तद्दधिभावेन परिणमते तत्र नावयवानामन्येषामुपादानत्वमभ्युपगतं
किं तु प्रातमेव क्षीरमेकमनुपादेयं दधिभावेन परिणमते यथा निरवयवपरमाणुवादिनां क्षीरप
रमाणुर्दधिपरमाणुभावेनेति सोऽयमतिरोहितार्थः॥ एतेन मातरिश्वा व्याख्यातः॥ यथा भ्या
सेऽभयस्त्वमर्थस्य भवति नास्य स्मृतत्वे दूरत एवोपचरितं बहं तमोः पवनस्य नित्यत्वप्रसं
गः॥ वायुश्चान्तरिक्षं मे दममृतमिति वायोरमृतत्वमुक्तं पुनः पवनस्य विशेषेणाह सैषान
स्तमिता देवता यद्वायुरिति॥ तस्माद्भ्यासान्नापेक्षिकं वायोरमृतत्वमपि त्वात्यन्तिकमेवेति
मा भूत्। तदिदमुक्तं भाष्यकृता। अस्तमयप्रतिषेधात् अमृतत्वश्रवणाच्चेति॥ येन समुच्च
यार्थेनाभ्यासो दर्शितः॥ एवं प्राप्त उच्यते॥ एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया व्याप्यस्य प्रा
धान्यात् तदुपपादनार्थत्वाच्च वाक्यान्तराणां तेषामपि चाद्वैतप्रतिपादकानां मातरिश्वोत्पत्ति
क्रमप्रतिपादकानां बहुलमुपलब्धेर्मुख्यभयस्तासाम्यामन्यषां श्रुतीनां बलीयस्त्वादेतद
नुरोधेनामृतत्वास्तमयप्रतिषेधावापेक्षिकौ तेन नेतव्याविति भयस्त्वीः श्रुतीरपेक्ष्य ह

के॰

२

अविरुद्धतीशरदमात्रमुक्तो॥ अनेनैव वस्तुनस्तोऽनुपपत्तेः॥ ननु न चास्य कश्चिज्जनितेत्यात्मनः सतोऽस
कारणत्वश्रुतेः कथमुत्पत्तिः केनाप्यनेन वचनेन महद्भूतप्रदेः पत्तइतिपुक्तमधीतवेदस्य ब्रह्मलिङ्गिनात्माधिकी
राद्दर्शनान्नानुपपत्तेरित्यत आह वियत्पवनयोरिति॥ यथा हि वियत्पवनयोरस्मततात्त्वात स्वमयत्व
श्रुतीश्रुत्यन्तरविरोधादपेक्षिकत्वेन नीतौ एवमकारणत्वश्रुतिरात्मनोऽग्निविस्फुलिङ्गदृष्टान्त
श्रुतिविरोधात् प्रमाणान्तरविरोधाच्चापेक्षिकत्वेन व्याख्यातव्या॥ न चात्मनः कारणवत्त्वेऽनव
वस्थानेकान्तिकता ब्रह्मत्वनादितत्कार्यकारणपरम्परया इति भावः॥ तथाविकारेभ्य इति प्रमाणा
न्तरविरोधो दर्शितः॥ एवं प्राप्त उच्यते। सदेकस्वभावस्योत्पत्त्यसंभवं॥ ॥ ॥ कुतः अनुपप
त्तेः सदेकस्वभावे हि ब्रह्मण्यापतेतत् स्मृतिबाधकेनान्यपाधितव्यः॥ उक्तमेतद्धि कारणं सत्त्वेना
नुभूता अपि कतिपयकालकलातिक्रमेऽविनश्यतो दृश्यन्त उत्पत्तिर्विवचनीया न चैकात्मा वच्छेदादि
ति॥ न चात्मा तादृशः सर्वस्य अतेरनुभवाद्वर्तमानैकस्वभावत्वेन प्रसिद्धेः। तदिदमाह सत्ता
त्रेहिब्रह्मेति। एतदुक्तं भवति यत्स्वभावाद्विचलतीति तदा निर्वचनीयं निर्वचनीयोपादानं प्रयुक्तेन

वा॰ रा॰ २। तु विपर्ययः यथा रज्ज्वुपादानः सर्पः न तु सर्पोपादाना रज्जुरिति। ययोस्तु स्वभावादप्रच्युतिः कार्ययोर्निर्व
६ चनीययोर्न्नोपादेयोपादानभावो यथा रज्ज्वाकृतिकयोरिति॥ न च निरधिष्ठानो विभ्रम इत्याह नाप्य
सत इति॥ न च निरधिष्ठानभ्रमपरंपरानादितेत्याह मत्प्रवृत्तानुपगमे न च स्यादसंगादिति।
पारमार्थिको हि कार्यकारणभावोऽनादिर्नीनवस्थया दुष्यति॥ समारोपस्तु विकारस्य न समारोपि
तोपादान इत्युपपादितं भाष्यमिव मत निषेधाधिकारे तत्रत्येन प्रस्मर्त्तव्यं॥ तस्माज्जगदधिष्ठा
न विभ्रमसमर्पणानादितेनोचितेत्यर्थः॥ आग्नेर्विस्फुलिंगाकृतिश्चोपाधिकरूपापेक्षयानेत
व्यारोपमातिरोहितार्थः॥ येत्तु नन्वादिकालोत्पत्तिविषयमिदमधिकरणं वर्णयांचक्रुः तैः मतो
ऽनुपपत्तेरितिलोरोनव्याख्येये॥ अविरोधसमर्थनप्रस्तावे चास्यासंगतिर्वेत्त व्याख्यानादिव
दिकालादीनामुत्पत्तिप्रतिपादकवाक्यानवगमात॥ तदस्मिन्नावत॥ तेजोतस्तथा ह्याह॥ यद्य
पि वायोरग्निरित्यापादनं पंचमीकारकविभक्तिरुपपदविभक्तेर्वेलीयसीति नेयमानेत
र्यपरा युक्ता॥ तथापि बहुश्रुतिविरोधेन दुर्बलाप्युपपदविभक्तिरेवात्रोचिता॥ ततस्रानेत

यंदर्शनपरेयं वायो रग्निरिति श्रुतिः न च साक्षात्प्रमाणत्वं संभवेत् तद्‌ प्रपत्वेन तत्प्रत्वं परं परया श्र
यितेषु पुत्रेष्वाजपेयस्य प्रवृद्धिति प्रासं । एवं प्राप्त उच्यते ॥ पुत्रे पश्वाद्यागवाजपेययोरंगांगिनोर्नाना
त्वात्तत्र साक्षात्कृतजपेयासंबंधेऽप्रेणेन परं परयाश्रयणं इहतु वायो गुणविकारस्याधिष्ठितमो वस्तु
तोऽनन्यत्वात्साक्षात्संबंधो यो दानते साक्षादेव ग्रहोपादानत्वोपपत्तेः ॥ कारकादिभेदेऽग्नौ लीपसाद्यानुरोधे
नोभयथोपपद्यमाना । श्रुतयोःकांत्स्यभोक्ष्यन्यायेन नियम्यत इति पुत्र स्मितिराद्धांतः । पारे
पर्वणत्वे वीतिभेदन लक्षणाभिप्रायं पतः । पारेमार्थिकमभेदमाह वायुभावापत्तेर्गोत्वमितिन । यथा
तस्याः श्रुतमिति तु दृष्टांतः परंपरामात्रसाम्याने न न तु सर्वथा साम्येनेति सर्वमवदातं ॥ आप्यः ॥
निगदव्याख्यातेन भाष्येण व्याख्यातं । पृथिव्यधिकरणपराकांतरेभ्यः ॥ अन्नशब्दोपचयुत सम
च पत्ति व्याव ब्रीहियवादौ तद्विकारे चौदने प्रवर्तते । श्रुतिश्च प्रकरणाद्वलीयसीत्यध्यवसायो
पिष्टपो दलितापत्रं चनवर्षितीत्यनेन । तस्मादस्य बलायं ब्रीहियवाद्येवान्नाद्वेनाप्यत इति
विवर्तितं । कोष्यसंपि हि तं भवति तस्य च्छिन्दनीयमना हि पृथिव्यपिवच्छालो हितानि रूपा

वा॰ २।२

६

याऽत्रपि दर्शनात्॥ तत श्रुत्यंतरेण प्रश्नः पृथिवी पृथिव्या ओषधय इत्यादिना विरोध इति पूर्वः
पक्षः अत्रापि विरोध एव श्रुतिविरुद्धत्वानुपपत्तेरन्यतरानुगुण्येन तयोऽन्यतरा नेतव्या तत्रादि
मपक्षः पृथिवीति पृथिवीशब्दोऽन्नपरतया नीयतामुतान्नमसृजंतेत्यन्नशब्दः पृथिवीपरतयेति
विशये महाभूताधिकारानुरोधात् प्राप्तिमत्कृष्णरूपानुरोधाच्च तद्यदपां शर आसीदिति च
पुनः श्रुत्यंतरानुरोधाच्च वाक्यशेषस्य चान्यथानुपपत्तेरन्नशब्दोऽन्नकारणे पृथिव्यामिति
राद्धांतः॥ तदभिध्यानादेव तु तल्लिंगात्सः॥ नन्वपि क्रमे भूतानामविरोध उक्तः इदानीमाका
शादिभूताधिष्ठात्र्यो देवताः किं स्वतंत्रा एवोत्तरोत्तरभूतसर्गे प्रवर्तंत उत परमेश्वराधिष्ठि
ताः परतंत्रा इति॥ तत्राकाशाद्वायुर्वायोरग्निरिति स्वकार्ये निरपेक्षाणां अतः स्वयं चेतनानां
च चेतनांतरापेक्षायां प्रमाणाभावात् भूतानां स्वकाले गम्यन पारंपर्येणापि मूलकारणस्य
ब्रह्मण उपपत्तेः स्वतंत्राण्येवाकाशादीनां वाय्वादिकारणत्वमिति तन्यते वायोऽनिलव्याघात
इति प्राप्ते एवं प्राप्तेऽभिधीयते॥ आकाशाद्युपरि त्वादयश्चाकाशादीनां केवलानामुपादानभा

श्री

वमाचष्टे तेन गुणः स्यात् चेतनाधिष्ठितत्वं॥ नच चेतनानां स्वकार्ये स्यात् त्र्यामित्वदप्येकोतिके परतंत्रा
णामपि तेषां बहुलमुपलब्धेः अतो तेवास्यादिवत्। तस्माल्लिंगप्रस्तावमसामंजस्याय स ईश्वर एव तेन
तेनाकाशादिभावेनोपादानभावेनावतिष्ठमानः स्वयमधिष्ठाय निमित्तकारणं अतः तैर्विका
रं वा बुद्धिं सृजतीति पुंसो ३ तस्माल्लिंगप्रस्तावो लोकेशितोस्यातामिति॥ परमेश्वरो वेशावशादिति प
रमेश्वर एवोन्तर्यामिभावेनाविष्टं द्विता तस्मात्सर्वस्य कार्यजातस्य साक्षात् परमेश्वर एवाधि
ष्ठाता निमित्तकारणं न त्वाकाशादिभावमापन्नः॥ आकाशादिभावमापन्नो मुपादानमिति सिद्धं॥
विपर्ययेण तु क्रमो तत उपपद्यते च॥ उत्पत्तौ महाभूतानां क्रमः अतो नाप्यये क्रमोप्ययमात्रस्य
भूतत्वात्तन्नियमे संभवति नानियमः॥ व्यवस्थारहितो हि सः॥ न च व्यवस्थायां सत्यामव्यव
स्थायुज्यते तत्र क्रमाभेदापेक्षायां किं दृष्टोप्ययक्रमो घटादीनां महाभूताप्ययक्रमस्य नियाम
को न स्याद् इति चेत् उत्पत्तिक्रम इति विशेषेण तस्य श्रोतांतरमस्पर्शितं समानजातीयत्वात् तस्यैव
बुद्धिसान्निध्यात्॥ न दृष्टविजातीयत्वात् तस्मात् श्रोते नैवोत्पत्तिक्रमेणाप्ययक्रमो नियम्यत इ

बा॰।२।३। तिप्राप्तं। एवं प्राप्त उच्यते। अप्ययस्य क्रमापेक्षत्वाभावे उत्पत्तिक्रमो नियामको भवेत्। न त्वस्याप्ययस्य
८ क्रमापेक्षत्वादनुमानोपनीतेन क्रमभेदेन श्रुत्यनुसारिणोऽप्ययक्रमस्य बाध्यमानत्वात्।।
तस्मिन्नसति उपादानोपरमे ह्युपादेयमस्तीति स्यान्न चेतरदस्ति। तस्मान्नाहिरहदृष्ट्यो भावको
धादकं हेवनास्तिकमान्तरे मत्ययोग्यत्वात् तस्मात्तदिदमुक्तं तत्त्ववतोपपद्यते चेति। भाष्यकारो
पे प्याह न चास्या व्ययोग्यत्वात्प्रत्यक्षो ह्युत इति। तस्मादुत्पत्तिक्रमाद्विपरीतः क्रम इति एतन्न्याय
मत्वा च स्मृतिरुक्ता।। अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात्।। तदेवमाद
नोपपत्तिके भूतानामुत्पत्तिप्रलयौ विचार्याधुनाद्विपमनसां क्रमं विचारयति। अत्र चाविज्ञा
यतेनेनेति व्युत्पत्त्या विज्ञानशब्देनेन्द्रियाणि मनोबुद्धिं च गृह्यते। तत्रैतेषां क्रमापेक्षणाया माख्याने चेम
तानि चान्तरा समाम्नानान्नैव पाठेन क्रमो नियम्यते। तस्मात्पूर्वोत्पत्तिक्रमभङ्गप्रसङ्गः।।
यतः आत्मनः करणानि करणेभ्यश्च भूतानीति प्रतीयते तस्मादात्मन आकाश इति भज्यते।।
अन्नमयमिति च मयडानंदमय इति च न विकारार्थ इति जाते अभिधीयते विमतत्वान्तावत्मनः

वो

प्रसक्तीनां कारणापेक्षायामनन्तमयप्रसक्तान इत्यादिलिंगा अवरणादयेपि हि तार्षिकयपन्नायाविकारापितत्वमे
वमयटोपुत्रमस्मितरपात्वनपेक्षितमठंतो भवेत॥ न चैतदपिघटते॥ नहि आनन्दमयो यज्ञ इति वदन्नप्रा
डुर्धिमनन्तः भवति॥ एवं चेद्भूतविकाराणां नन्दादयो भूतानां परस्तादुत्पद्यत इति युक्तं॥ प्रोक्तवादि
तयाप्युपेत्याहऽस्मप्तत्वभौतिकानीति॥ भवतात्मनएव करणानामुत्पत्तिः॥ नरवल्वेवतावताभौतिका
नो त्मनोत्पत्तव्या॥ तथा च नौतत्रेमभेगमसंगः विशिष्यतेभण्यतेभज्यत इति पावत॥ चराचरव्य
पाश्रयस्तुस्यात्तद्व्यपदेशोभाक्तस्तद्भावभावित्वात्॥ देवदत्तादिनामधेयंतावन्नजीवात्मनोनशरी
रस्यतेनात्मनेशरीरावयवत्राह्नहिकरणानुपपत्तेः॥ तत्स्मात्तो देवदत्तोजातो देवदत्त इति व्यपदेश त
स्य कुरव्यतं मनसा न स्य प्रवेपदः अव्यवलेशात्मनो बुध्धिस्वर्गादिफलसंबंधानुपपत्तेः शास्त्र
विरोधाल्लौकिकोव्यपदेशोभाक्तोव्यारव्येयः॥ भाविशरीरस्योत्पादविनाशौ तत्तकृत्संयोग
इतिजातकर्मादि च गर्भबीजसम्बन्धजीवपापप्रशमार्थं नतुजीवजन्मजपापप्रशमार्थं॥ अत
एव स्मरति॥ एवमेनः शमंयाति बीजगर्भसमुद्भवमिति॥ तस्मान्नशरीरोत्पत्तिं विना स्वात्म्पं

६६ ६

[illegible]

बा॰ २।३। जीवजन्मविनाशाविति सिद्धं॥ एतच्च लौकिकव्यपदेशस्य जातो मृत इति भाक्तत्वमभ्युपेत्याधिकरणं॥३॥ तात्त्व
धास्मभाष्येस्य जातो ति मृत लोकेति॥ नामतामस्य शरीरे देहयव्ययाभ्यां स्यफलावुत्पत्तिविनाशौ॥
८ ज्ञाकाशादेरिव तु महासर्गादौ तद्देतेचोत्पत्तिविनाशौ जीवस्य भविष्यत इति शंकांतरमपनेतुमि
दमारभ्यते॥ नात्माश्रुतेर्नित्यत्वाच्च ताभ्यः॥ विचारमूलसंशयस्य बीजमाह श्रुतिविप्रतिप
त्तेरिति॥ तामेव दर्शयति कास्विदिति श्रुतिस्मृती॥ पूर्वपक्षे हेतुर्गत्वा इति तत्र प्राप्तमिति॥ परमात्मनस्त्वव
किरुद्धधर्मीसंसर्गादपहतानपहतपाप्मत्वादिलक्षणात् जीवानामन्यत्वे ते चेच्च विकारत्वे
त्वांतरत्वे बहुतराहैतश्रुतिविरोधः॥ ब्रह्मविज्ञानेन सर्वविज्ञानप्रतिज्ञाविरोधश्च तस्मादश्रु
तिभिरनुज्ञायते विकारत्वे॥ प्रमाणांतरे बोधोक्तेः विभक्तत्वादाकाशादिवदिति॥ यथाग्नेः क्षुद्रा विस्फु
लिंगा इति च श्रुतिः सा ह्यादेव ब्रह्मविकारत्वं जीवानां दर्शयति। यथा सुदीप्तात्पावकादिति च ब्रह्म
णो जीवानामुत्पत्तिं चैतत्रापि यं च सा ह्यादर्शयति॥ नन्वेतेरां जीवानामुत्पत्तिप्रलयाववगम्ये
ते न जीवानां नित्यत्वमाह जीवात्मना नास्तीति॥ तस्मादेतत्स्त्वपि श्रुतिष्वाकाशाद्युत्पत्तिरिव तस्माज्जी

वस्मा

वोत्पत्तिर्न्नोपपद्यते तस्मादात्मा नयोगस्य नात्मानात्मस्योत्पत्त्यभावं प्रतीम इत्यतआह न च विस्त्र
व्याप्सिति॥ एवं हि कस्यचिच्छास्त्रार्थमात्मनः तस्य कातिपयांगसहितस्य कर्मिणः शास्त्रं चान्तरीपांगोपसं
लारी न भवेत् तस्मादुक्तं तदश्रुतिविरोधात् न्युपमेयाश्रुतिर्विकारभावापत्त्या व्याख्येया॥ तस्मा
दाकाशादिवज्जीवात्मान उत्पद्यत इति प्राप्त उच्यते॥ भवेदेवं यदि जीवा ब्रह्मणोऽभिद्येरन् न त्वेद
ने मितस्तत्सृष्ट्वा तदेवानुप्राविशदित्यैत्वाद्यविभागश्रुतेः॥ औपाधिकत्वाच्च भेदस्य घटकरकाद्याका
शवद्विरुद्धधर्मसंसर्गस्योपपत्तेः॥ उपाधीनां च मनोमय इत्यादीनां श्रुतेः अपसीनां चानित्य
त्वाजत्वादिगोचराणां श्रुतीनां दर्शनात्॥ उपाधिभावे लये नोपहितस्येति च प्रतिज्ञा नराम्या
मनेकधोपपादनात् श्रुत्याऽविभागस्यैवोदेवः सर्वभूतेषु गूढ इति श्रुत्यैवोक्तत्वान्नित्या
जीवात्मनो न विकारा न चाद्वैतप्रतिज्ञाविरोध इति सिद्धं॥ मैत्रेयीब्राह्मणं वा ब्रह्मव्याख्यातमि
तिनेह व्याख्यातं॥ ज्ञोऽत एव॥ ज्ञानस्य हि जानात्युपाधिव्याप्त ज्ञानाभावे न भवति घटइव घटमध्य
जाभावे। स्वप्नाद्यवस्थास्वचक्षुरयस्याभावात् तत्र व्याप्यस्य ज्ञानस्याभावः तथा च नात्मस्वभाव

श्री रा०रा०

१. श्रेतन्यत इन्तुवृत्तावपि चैतन्यस्य व्यावृत्तेः। तस्मादिन्द्रियादि भावाभावानुविधानाद् ज्ञानभावाभा
वयोरिन्द्रियादि सन्निकर्षापेक्षमाणं तु कस्य चैतन्यधर्मो न स्वाभाविकः। अत एवेन्द्रियादीनाम
३ पिवलं गतस्यावैयर्थ्यमिन्द्रियाणां भवे त नित्यचैतन्यस्यात पस्य शरीरग्रहणप्रयोग व्यारव्यया। अकि
आ हितानो[illegible]त्पादनशक्तिर्निर्जीवानां नतु व्योम्न इवेन्द्रियादिसंनिकर्षापेक्षं ज्ञानेन भवतीति॥
तस्मान्नूढा एव जीवा इति प्रासेऽप्रध्यीयते॥ यदा गं तु कज्ञाने जेऽ स्वभावंत कदाचित्परोदे
कदाचित्संदिग्धं कदाचिद्विपर्यस्तं यथा घटादि। न चैवमात्मा॥ तथा ह्यनुमिमानोपरोद्दे
स्मरं न प्यानुभविकः॥ संदिहानोप्यसंदिग्धो विपर्यस्यन्नप्यविपरीतः सर्वस्यात्मा तथा १
वततस्वभावः न वततस्वभावस्य चैतन्यस्याभावकल्पने त्यागात्। तस्माद्धत्तपः क्रियाक
पाः सधर्मिका न मर्माभावे स्वभुतादोनि वर्त्तते न चैतन्यमात्मस्वभाव इति सिद्धं। तथा च
नित्यचैतन्यवादिन्यः अतयो न कथंचित्प्रौढेन व्याख्यातव्या भवन्ति॥ गंधादिविषय
वस्तुपजने चेन्द्रियाणामर्थवर्त्तीति सर्वमवदतां। उक्तं तिगत्यायतीनां॥ यद्यप्यावृत

स्यैव परमात्मनो जीवभावस्तथा चाणुपरिमाणत्वं ॥ तथाप्युत्क्रान्तिगत्यागतीनां श्रुतेरस्माच्छ
ह्यणुपरिमाणावगमस्य चाविरोधार्थमिदमधिकरणमित्याद्युपसमाधानाभावमाशङ्क्य न त्वेवेति ॥
सर्वपदे गच्छतीति तत्र प्राप्तेर्नावधिरिति विभागसंयोगोत्पादे हि उत्क्रान्त्यादीनां फलं ॥ न च सर्वगत
स्यैते स्युः ॥ सर्वत्र नित्यप्राप्तस्य वास्तवी तव सर्वावादेः संभवादिति ॥ स्वात्मना चोत्तरयोः ॥ उत्क्रा
मणं हि मरणेऽनिरूढं तथा चलतोऽपि तत्र सतो देहस्वाम्यनिवृत्त्योपपद्यते ॥ न तु गत्यागती
तयोः स्वात्मलाभेऽनिरूढयोः कर्तृस्वभावयोर्व्यापिन्यसंभवादिति ॥ मध्यमं परिमाणं महत्त्वं राशी
स्यैव तत्राहितपरीणामापोप्रत्युक्तं ॥ गत्यागती च परममहत्त्वेन संभवेतोऽतः पारिशेष्यादणु
त्वसिद्धिः ॥ गत्यागतिभ्यां च प्रादेशिकत्वसिद्धौ मरणमपि देहादुपसर्पणमेव जीवेन तु तत्रैव
तः स्वाम्यनिवृत्तिमात्रमिति सिद्धमित्याह स्वात्मना चोत्तरयोर्गत्यागत्योरिति ॥ द्रुतश्च देहादुपसर्पण
मेव जीवस्य मरणमित्याह देहप्रदेशानामिति ॥ तस्मादुत्क्रान्त्यपेक्षोत्क्रान्तेरपि सापादा
नाणुत्वसाधनमित्यर्थः ॥ न केवलमपादानश्रुतेर्गत्युद्धृतशरीरप्रदेशगतव्यश्रुतेरप्येवमेवेत्या

देहस्वाम्यनिवृत्तिरेव उत्क्रमणं

वै

सा

बा॰ ।२।३।२। हृदयन्ताज्ज्योतिर्मात्रा इति ॥ नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् ॥ यत उक्तं त्यादि श्रुतिभिर्जीवाना
मणुत्वं प्रसाधितं तत्तेन व्यापकात्परमात्मनो नेषां तद्धिकारतयामेरः ॥ तथा च महत्वानंत्यादि श्रुतयः
११ परमात्मविषया न जीवविषया इत्याविरोध इत्यर्थः ॥ यदि जीवा अणवः तर्हि योयं विज्ञानमयः
प्राणेष्विति कथं शारीरो महत्वसंबंधित्वेन प्रतिनिर्दिश्यत इति चोदयति नाद्वीति ॥ परिहरति शा
स्त्रदृष्ट्या परमार्थदृष्ट्या निर्देशो वामदेववत् यथा हि गर्भस्थ एव वामदेवो जीवः परमार्थदृष्ट्यात्म
नो ब्रह्मत्वं प्रतिपेदे एवं विकारकत्वं ब्रवते तेनोक्तवादमेदान्तत्वपरिमाणव्यपदेशा इत्यर्थः ॥ स्वशब्दो
न्मानाभ्यां च ॥ स्वशब्दं विभजते मात्रादिति ॥ उन्मानं विभजते तथोन्मानमपीति उद्धृत्य माने
मुन्मानं ॥ बालाग्र उद्धृतः शत ततमो भाग स्याग्रे दधिशत तमा उद्धृतः शत तमो भाग इति ॥
तद्दिदमुन्मानमाराग्रोद्धृत मानमाराग्रमात्रमिति ॥ सत्रांतरमवतारयितुं चोदयति ॥ ननु अ
णुत्वे सतीति ॥ अणुरात्मा न शरीरव्यापीति न सर्वाङ्गीणशैत्योपलब्धिः स्यादित्यर्थः ॥ अवि
रोधश्चंदनवत्त्वक्संपर्की जीव स्त्वक् च सकलशरीरव्यापिनीति त्वग्व्याप्यात्मसंबंधः स

ङ्गीणशैत्योपलब्धौ समर्थ इत्यर्थः ॥ अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि ॥ चंदनबिंदोः प्रत्यक्ष
तोऽल्पीयस्त्वं बुध्वा पुनः कल्पना भवति ॥ यस्य तु संदिग्धमणुत्वं सर्वांगीणं च कार्यमुपलभ्यते तस्य व्या
पित्वमेव स्वर्गीकमपहाय नेयं कल्पनावकाशं लभत इति शंकार्थः ॥ न चेह हरिचंदनबिंदुदृष्टांतेनाणु
त्वानुमानं जीवस्य प्राग्दृष्टांतसंभवेनानैकांतिकत्वादित्याह नाचानुमानमिति ॥ कंकामिमामपा ग्रा
करोति अभ्युपगमादिति ॥ यद्यपि पूर्वोक्ताभिः श्रुतिभिरणुत्वं सिद्धमात्मनः तथापि वेदनावाचक्रत्वं प्रत
रनुपपत्त्यर्थं ॥ गुणाद्वा लोकवत् ॥ येनु भावप्रवृत्त्या चंदनबिंदोरणुसंचारेण देहव्याप्तिरुपपद्यते न
त्वात्मनोऽनवयवस्याणुसंचारः संभवतीत्यत्राद्वैषम्यमिति मन्यते तान्प्रतीदमुच्यते गुणाद्वालो
कवदिति ॥ तद्विभजते चैतन्येति ॥ यद्यप्यणोर्जीवस्याल्पापि तद्गुणश्चैतन्यं सकलदेहव्यापि यथा प्रदीप
स्याल्पत्वेऽपि तद्गुणः प्रभा सकलगृहोदरव्यापिनीति । तदपि संकाङ्कुरे णदूषयति वादी दृष्टांतो नरमा
न व्यतिरेको गंधवत् । आत्मीयमाणमपि तदिति द्रव्यस्यापि सक्रमत्वानुपलभ्यमानत्वेऽपि
कंदतेस्यादेतदिति विभिन्नं नामल्पत्वादित्युपलब्धेर्णुं द्रव्यांतरे परमाणूनामनुप्रवेशादित्यपि द्र

ब्र।२।३। द्रव्यं॥ विशेषानुप्रवेशाभ्यां वसनादिविशेषः स्पर्शत्वान्नोपलभ्यत इति॥ निराकरोति न कुत इत्यतो ग्रिय
१२ त्वादिति॥ परमाणुत्वेन परममहत्त्वेन त्वात्मत्वात् ऊतरूपादिवदुपोपि नोपलभ्येतोपलभ्यमानो वा स्त
ब्धउपलभ्येत न स्थूलद्रव्यं॥ शेषमतिरोहितार्थं॥ पद्यमुपदेशात॥ निगदव्याख्यातमस्य भाष्यं॥
तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत॥ करकतोदनेपीति॥ महदल्पयोः संयोगोऽल्पमवरुध्य
तेन महतोऽनेनज्ञातृघटकरकादिसंयोगान्तस्कंधेन नभोव्याप्नुवते॥ अपितु अल्पानेव घटकर
(अत्र तत्र कादीनितरथापि तेनमन्त्रसर्वत्र घटकरकाद्युपलंभ इति तेपि नद्रः परिमाणः प्रसज्येपरस्मिन्निति अन्न
चारेण तीव सपक्षकलशरीरगता वेदनोपपद्यते॥ पद्यपद्यंते नसरणमरणनत्वापि तस्य त्वचासंबंधा णा
त॥ त्वचश्च समस्तशरीरव्यापित्वाद्देहदेशेप्वाधिष्ठितात्वगधिप्रि तैवेति शरीरव्यापी जीवः शक्नोति स
कलशरीरेषु तपमनभविनुं तत्रिंद्रियेण गंगाया॥ अण्वस्तु जीवो यत्रास्ति तेन शरीरप्रदेशेन तदनुभवेनन तस्मि
सर्वशरीरं तस्यासर्वशरीरत्वात्करकतोऽनेनप्रदेशेन तपानसर्वशरीरोपलब्धिरिति वैषम्यं॥ गु
णत्वमेव हीति॥ इदमेवाहिं गुणत्वेनांगुणात्वंपटुव्यपदेशात्वमत एव हि हेमंतेविषक्ताव पयव नापा

द्रव्यगतेतिसांद्रेशीतस्पर्शेनुभूयमानेप्यनुद्भूतेरूपेनोपलभ्यते यथा तथा मृगमदादीनां गंधवा
हविप्रकीर्णकस्तूर्यावयवानामपि सांद्रे गंधेनुभूयमानेरूपस्पर्शौ नानुभूयेते। तत्र कस्माद्धेतोरनु
द्भूतत्वात्तयोर्गंधस्य चोद्भूतत्वादिति॥ न च द्रव्यस्य प्रदेशप्रसंगः॥ द्रव्यांतरावयवप्रकरणादेतदेव
कालपरिवासवशाद्द्रव्यस्य हतगंधितोपलभ्यते॥ अपि च चैतन्यं नाम न गुणो जीवस्य गुणिनः। किं
तु स्वभावः न च स्वभावस्याव्यापित्वे भावस्याव्यापित्वं तत्र च्युतेरित्याह यदि चैवैतन्यमिति॥ तदेवं
तिस्मृतीतिहासपुराणेषु सिद्धे जीवस्याविकारित्वे तथा परमात्मत्वेन पाश्रुत्यादितः परममहत्त्वेना
णुत्वस्य तदवस्थस्येह तदनुरोधेन बुद्धिगुणसारतया व्यपदेश इत्याह तद्गुणसारत्वादिति॥ तद्धा च
हेतस्या बुद्धेरिति॥ आत्मनास्त्व संबंधिन्या बुद्धेः रूपस्यापितत्वान्नदापकामर्षः॥ न हि सुषुप्त्ये स्वभा
भावस्यात्मनस्तत्वेन संसारिभिरनुभूयते अपितु पोषं मिथ्याज्ञानदूषापपनुषक्तोस्य एव न प्रत्या
त्ममनुभवगोचरः॥ न च ब्रह्मस्वभावस्य जीवात्मनः कूटस्थनित्यस्य स्वाद्यादौ ह्युपायानुपपत्तेर्य
व इति बुद्धिगुणानां तेषां तदभेदाध्यासेन तद्धर्मोऽध्यासः उपसंसारावाप्यस्तस्यैव चेदृशस्याविं

बा॰रा॰३।
१३

वस्तोयपंकवत्ताव्याध्यास इत्युपपादितमध्यासभाष्ये। तथा च बुद्ध्युपाधिकृतमस्य जीवत्वमिति बु
द्धेरंततः नरकस्थाणुतया सोऽप्यणुत्वव्यपदेशभाग्भवति नभ इव करकोपहितं करकपरिमाणं तथा
चोत्क्रांत्यादीनामुपपत्तिरिति निगदव्याख्यातमितरत्॥ प्रापणेऽस्मत्पक्षे संसारित्वे वा ततश्चाकृ
तविप्रनाशाकृताभ्यागमप्रसंगः॥ यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात्॥ यावत्संसार्या
त्मभावित्वादित्यर्थः॥ समानः संनिति। बुद्ध्या समानः तद्गुणसारत्वादिति॥ अपि च मिथ्याज्ञाने
ति॥ न केवलं यावत्संसार्यात्मभावित्वमागमतः उपपत्तितश्चेत्यर्थः॥ आदित्यवर्णमिति प्रकाशरू
पमित्यर्थः॥ तमसः इत्यविद्यायाः इत्यर्थः॥ तमेव विदित्वा साक्षात्कृत्य मृत्युमविद्यामत्येतीति यो
जना॥ अनुशयबीजं पूर्वपक्षी प्रकल्पयति ननु सुषुप्तप्रलययोरिति॥ सता परमात्मना॥ अनुश
यबीजपरिहारः सूत्रेणोच्यते॥ पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात्॥ निगदव्याख्यातमस्य
भाष्यं॥ नित्योपलब्ध्यनुपलब्धिप्रसंगोऽन्यतरनियमो वान्यथा॥ स्यादेतत् तदंतःकरणेऽपि सति तस्यानि
त्यं संनिधानात्तस्मान्नित्योपलब्ध्यनुपलब्धी न प्रसज्येते आपादयति विपाककादाचित्कत्वात्साम त

ष्यप्रतिबंधाप्रतिबंधाभ्यामंतःकरणस्यनायंप्रसंगः।तावकत्वेंतःकरणेआत्मनोवेंद्रियाणांवास्तो
किमंतर्गडुनांतःकरणेनेतिचोद्यप्रतिक्षेपवान्यतरस्यात्मनइतिक्षेपेवतिसिद्धौतन्निवर्त्तयतिसिद्धांतीद्व
तेनचात्मनइतिअवधानंस्वस्त्वनुभूमषाभूअषावा॥नचैतेआत्मनोधर्मास्तस्याविक्रियत्वात्॥
नचेंद्रियाणामेकैकेंद्रियव्यतिरेकेण्यंधाद्दीनांदर्शनात्॥नचतेआंतरत्वेनानुभूयमानेबाह्यसंं
भवतः॥तस्माद्वस्तितदंतरेकिमप्यस्यैवेतेतदंतःकरणंतदिदमुक्तंयस्यावधानेति॥अत्रैवार्थेश्रु
तिंदर्शयतितथाचेति॥कर्त्ताशास्त्रार्थवत्वात्॥ननुतद्गुणसारत्वादित्यनेनैवजीवस्यकर्त्तृत्वंभोक्तृ
त्वंचलब्धमेवेतितद्युक्तादनमनर्थकमित्यतआहतद्गुणसारत्वाधिकारेणेति॥तस्यैवेषप्र
पंचःपेपप्रपंच्यत्वात्मभोक्तैवननचैतितन्निराकरणार्थंशास्त्रफलंप्रयोक्तरितल्लक्षणत्वादित्या
ह्यस्माभगवान्जैमिनिः।प्रयोक्तर्यनुष्ठातरिकर्त्तरीतियावत्।शास्त्रफलेस्वर्गादिकुतःप्रयोक्तृफ
लसाधनतालक्षणत्वात्शास्त्रस्यविधेः।कर्त्रपेक्षितोपायताहिविधिः॥बुद्धिश्चकर्त्रीभोक्ता
चात्मातेतोयस्यापेक्षितोपायोभोक्तुनेतस्यकर्त्तृत्वंयस्यकर्त्तृत्वंनतस्यापेक्षितोपायइतिविं

बा·२।३।

१४

केनसंगतमितिचेत् शास्त्रस्यानर्थकत्वस्य विधीयमानाभिधेयत्वे तथा चाप्रयोजनत्वस्यात्॥ यथा च तत्कुण
मारतप्रास्यावमनु सदपि मोक्षत्वे सांव्यवहारिकमेव कर्तृत्वमपि सांव्यावहारिकमेव न तु मा
र्थिकं॥ अविद्यावद्विषयत्वं च शास्त्रस्योपपादितमध्यासभाष्य इति सर्वमवदातं॥ विहारोप
देशात्॥ विहारः संचारः क्रिया तत्र स्वातंत्र्यं नाकर्तुः संभवति तस्मादपि कर्ता जीवः॥ उपादाना
त्॥ तदेषां प्राणानामिंद्रियाणां विज्ञानेन बुद्ध्या विज्ञानं ग्रहणशक्तिमादायोपादायेत्युपादा
ने स्वातंत्र्यं नाकर्तुः संभवति॥ व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः॥ अस्योपसूत्रमेत
त्सम्यगुपपत्तिः॥ विज्ञानं कार्यं तनुते सर्वत्र हि बुद्धिः करणरूपा करणत्वेनैव व्यपदिश्यते न
कर्तृत्वेन इह तु कर्तृत्वेन तस्माद्व्यपदेशो विपर्ययः स्यात् तस्मादात्मैव विज्ञानमिति व्यपदिष्टः
न कर्त्रीति॥ सूत्रांतरमवतारयितुं चोदयति अत्राह यदीति। प्रेक्षावान् स्वतंत्र इष्टमेवात्मनः सं
पादयेन्नानिष्टमनिष्टसंपत्तिरप्यस्योपलभ्यते॥ तस्मान्न स्वतंत्रस्तथा च न कर्तेति तल्लक्षणत
त्स्येत्यर्थः॥ अत्रोत्तरं॥ उपलब्धिवदनियमः॥ करणादीनि कारकांतराणि कर्तृप्रयुक्तेन त

कर्तृत्वे सौत्रा

यं कारकांतरैः प्रयुक्तं इत्येतावन्मात्रमस्य स्वातंत्र्यं ॥ न तु कार्यक्रियायां न कारकांतरानपेक्षत्वमिति ॥ ईदृशं
हि स्वातंत्र्यं नेश्वरस्याप्यत्र भवतोऽस्तीतु अन्तःसंकल्पः कर्त्ता स्यात् ॥ तथा चाप्यदृष्टपरिपाकवशादिष्टमभिप्रे
प्सुरुत्साधनविभ्रमेण निःशेषाप्यं व्यापारयन्नित्थंमामुयादित्यनियमः कर्तृत्वं चेति न विरोधः ॥ विषय
प्रकाशनमात्रप्रयोजनत्वादिति ॥ नित्यचैतन्यस्वभावस्य खल्वात्मनः इंद्रियादीन्विषयमुपनयंति तेन
विषयावच्छिन्नमेव चैतन्यं बुद्धिरिति विज्ञानमिति व्याख्यायते ॥ तत्रास्याः क्रिया तं त्वात्मेत्यर्थः ॥ शक्ति
विपर्ययात् ॥ पूर्वं कारकवि शक्तिविपर्यय उक्तः संप्रति कारकशक्तिविपर्यय इत्यपुनरुक्तं ॥ अविप
र्यये तु कारणांतरकल्पनायां नामान्तरं विसंवाद इति ॥ समाध्यभावाच्च ॥ समाधिरिति संयममुपलक्ष
यति धारणाध्यानसमाधयो हि संयमपदवेदनीया यथाहुः ॥ त्रयमेकत्र संयम इति ॥ आत्मा वा अरे श्रो
तव्यो मंतव्य इति धारणोपदेशः ॥ निदिध्यासितव्य इति ध्यानोपदेशः ॥ द्रष्टव्य इति समाधेरुपदेशः
यथाहुः ॥ तदेव ध्यानमर्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिरिति ॥ सोऽयमिह कर्त्ता त्मा समा
धावुपदिश्यमानः आत्मनः कर्तृत्वमवेतीति सूत्रार्थः ॥ यथा च तक्षोभयथा ॥ अवांतरसंगतिमाह ॥ एवं

तावदिति॥ विमृशतीति॥ तत्पुनरिति॥ पूर्वपक्षे गृह्णातीति तत्रेति। शास्त्रार्थवत्त्वादयो हि हेतव आत्मनः कर्तृ
त्वमापादयन्तीति॥ न च स्वाभाविके कर्तृत्वे संभवति असत्यपवादे तद्दोषादिति युक्तमुपगंतुमतिप्रसंगात्
न च मुक्त्यभावप्रसंगोऽस्यापवादकः। यथा ज्ञानस्वभावो ज्ञेयाभावेपि नाज्ञो भवत्येवं कर्तृस्वभावो
पि क्रियावेशाभावेपि नाकर्त्ता तस्मात्स्वाभाविकमेवास्य कर्तृत्वमिति प्राप्तेभिधीयते॥ नित्यशुद्ध
बुद्धमुक्तस्वभावं हि ब्रह्मात्मनो भयः अयते तदस्य बुद्धत्वमसत्यपि बोद्धव्ये युक्तं वह्नेरिवासत्यपि दाह्ये
दग्धृत्वं तच्छीलस्य तस्यावगमात्॥ कर्तृत्वे तस्य क्रियावेशादवगंतव्ये न च नित्योदासीनस्य
कूटस्थनित्यस्यास्य वृत्तेस्तस्याः संभवति॥ तस्य च कदाचिदप्यसंसर्गे कथं तत्क्रियायोगः। नि
र्विषयायाः शक्तेरसंभवात्। तथा च यदि तादात्म्येन तद्विषयः क्रियावेशोऽभ्युपेयेत तथा सति तत्स्व
भावस्य स्वभावोच्छेदाभावान्न विनाशप्रसंगो न मुक्तस्यापि क्रियायोग इति क्रियायाः दुःख
त्वान्न विगलितसकलदुःखपरमानंदावस्था मोक्षः स्यादित्याशयवानाह न स्वाभाविकं कर्तृत्व
मात्मन इति॥ अभिप्रायमबुद्ध्वा चोदयति ननु स्थितायामपीति परिहरति न निमित्तानामपीति स तेषा

ज्ञानाश्रयाशक्तिः स्वसत्तामात्रसंबन्धात्कर्मादिविषयतः॥ तथा चैतत्पाद्विनेशत्वं सदैवस्याद्विति भावः॥ ननु यदि
ननु मोक्षसाधनत्वविधानादिति परिहरति न साधनतापत्तस्येति॥ आत्मनः कर्तृत्वमोक्षः साध्योऽपि
तद्ब्रह्मत्वं तत्त्वमनित्यमिति॥ उक्तमर्थमुपायमाविष्करोति॥ अपि चानित्यमुक्तेति॥ यदि पुनः
एवं तर्हि संसारीति॥ आशंक्य॥ परमात्मनः संसारी तस्याविद्याप्रविलयेऽपि मुक्तौ सर्वमुक्तेरनु
आविशेषाज्जातं सर्वसंसारोच्छेदप्रसंगः॥ परस्मादन्यस्य तु बुद्ध्यादिसंघातस्य एवेति तस्यैव तर्हि
मुक्तिः संसारो नात्मन इति॥ परिहरति नाविद्याप्रत्युपस्थापितत्वादिति॥ न परमात्मनो मुक्तिः सं दि
सारो तस्यानित्यमुक्तत्वात्॥ नापि बुद्ध्यादिसंघातस्य तस्याचेतनत्वात्॥ अपि त्वविद्योपस्थापि
तानां बुद्ध्यादिसंघातानां भेदात्तत्र बुद्ध्यादिसंघातभेदोपधानात् आत्मैकोऽपि भिन्न इ
व विभक्त इवैकस्य बुद्ध्यादिसंघातोपगमे तत्र बद्ध इवेतरत्र मुक्त इव यथा
गगनस्य घटाद्युपाधिभेदादेकमपि मुखं नानेव दीर्घमिव वक्रमिव स्थानमिवोदितमिवा व
न्यत्र मोपधानेन गमे तत्र मुक्तमिवान्यत्रोपहितमिवेति नैकमुक्तौ सर्वमुक्तिप्रसंगः॥ तस्मान्न

बा॰रा॰२। परमात्मनो मोक्षसंसारौ नापि बुद्ध्यादीनां व्यातस्य किं तु बुद्ध्युपहितस्य स्वात्मस्वभावस्य जीवभा
१६ वमापन्नस्येति परमार्थः॥ अत्रैवान्वयव्यतिरेकौ सूत्रितौ मिरादर्शयति तथा चेति॥ इतश्चोपाधि
के यद्युपाध्यात्मिभावो द्वाभ्यामस्यामि भेवाद्भेदो दर्शयति श्रुतिरित्याह तथा स्वप्नजागरितयो
रिति॥ अत्रैवार्थे स्मृतेर्व्याचष्टे तदेतदाहेति॥ संप्रसादः सुषुप्तिः स्यादेतत्तदुह्यः पाह्यपादयः सं
गीतरयं वास्याहीन्व्यापारयन्नसंभवेद्दुःखी परमात्मा तु न बध्यतः केन मतः प्रभृतीनि व्यापा
रयेदिति वैषम्यं तद्देहदृष्टान्तेनेत्यत आह तद्देहपात्रस्थेति॥ यथा स्वशरीरेऽणोदासीनः तद्वाम
रवी वास्याहीनि तु करणानि व्यापारयन्नुःखी तथा स्वात्मना नोदासीनः सुखदुःखी मनः प्रभृतीनि
तु करणानि व्यापारयन्नुःखी तथा तावतास्य माध्यं न तु सर्वथा॥ यथा त्वातीशोऽस्यथावा तत्रानपे च
ह्रः स्वशरीरं व्यापारयत्येवं मनः प्रभृतीनि करणानि तत्कालि व्यापारयतीति प्रमाणासिद्धेति
योग पर्यनुयोगानुपपत्तिः॥ पूर्वपक्षहेतनन्तुमाष्यदूषयति यतत्तस्मिन्निति॥ यत्पराति शास्त्रेस
एवशास्त्रार्थः॥ कर्त्रेयहितेऽपायभावनापरं चतततनकेर्त्स्वरूपपरं तेन यथा लोके किं ब्रह्मणी

रमपेक्ष्यस्वविषये प्रवर्त्तमानेन पुंसः स्वाभाविकं कर्त्तृत्वमवगमयितुमुत्सहते तस्मात्तत्त्वमसी
त्याद्युपदेशविरोधादविद्याकृतं तद्भवतीष्यते। चोदयति। ननु संध्ये स्थान इति॥ औपाधिकं हि क
र्तृत्वं नोपाध्यपगमे संभवतीति स्वाभाविकमेव मुमुक्षुरेष्टव्यमित्यर्थः॥ अपि च यत्रापि करणम
भ्युपगतं तत्रापि केवलस्यात्मनः कर्त्तृत्वस्यावगमात् स्वाभाविकमेव युक्तमित्याह तथोपादानेपीति॥
तदेतत्परिहरति न तावत्संध्य इति॥ उपाध्यपगमेऽपि संस्कृतैः करणस्योपाधेः संध्ये प्रव
स्थानादित्यर्थः॥ अपि च स्वप्नोपदर्शनं ज्ञानेनादृश्यो निहारोऽपीत्याह विहारोऽपि च तत्रेति॥ तथोपा
दानेपीति यद्यपि कर्तृविभक्तिः केवले कर्त्तरि श्रूयते तथापि करणकरणोपधानकृतमस्य कर्त्तृ
त्वेन शुद्धस्य न हि परशुसहायः छेत्ता केवलः छेत्ता भवति॥ ननु यदि न केवलस्य कर्त्तृत्वमपि
तु करणादिसाहित्यस्य तथा सति करणादिष्वपि कर्तृविभक्तिः स्यान्न चैतदस्तीत्यत आह भव
ति च लौकिकमिति॥ करणादिष्वपि कर्तृविभक्तिः कदाचिद्दत्वेपविवक्षावशादित्यर्थः॥ अपि चेयमुपा
दानश्रुतिः करणव्यापारोपरममात्रपरा न स्वातंत्र्यपरा कर्तृविभक्तिस्तु भाक्तीकृत्वेपि पति

का॰रा॰ यत्नीति वरं बुद्धिपूर्वेण स्वकरणव्यापारे परमस्य कर्तृत्वादित्याह अपि चास्मिन्नुपादान इति ॥ य
१८ स्मायं व्यपदेश इति ॥ यदुक्तमस्माभिर [illegible] रूपमात्रमेतदिति तदितः समुचितं सर्वकारका
णामेवेति ॥ निर्लिप्यति तण्डुलान्ज्वलेति काष्ठानि बिभर्त्ति स्थालीति हि स्वव्यापारे सर्वेषां कर्तृत्वात् उद्धृत
तिं बुद्ध्यादीनां कर्तृत्वमेव न करणत्वमित्यत आह उपलब्धये हेतोरेषां करणत्वान्नत्वेवं कर्तृ
तस्यामेवात्मनः स्वाभाविकं कर्तृत्वमस्त्वित्यत आह न चैतस्यामुपलब्धौ व्यापारस्य स्वाभाविकं
कर्तृत्वमात्मनः इति कस्मादित्युपलब्धिस्वरूपत्वादात्मनः। नहि नित्यस्वभावे चास्ति भावस्य
व्यापार इत्यर्थः। तदेवं तस्योपलब्धौ स्वाभाविके कर्तृत्वे समस्ति तु कं नापि बुद्ध्यादेरुपलब्धिकर्तृ
त्वमात्मनस्य धर्मस्य पपातञ्जलमध्ये वसापादि कर्तृत्वमित्याह अहंकारः पूर्वकमपि कर्तृत्वे
नोपलब्धुर्भवितुमर्हति ॥ कुतः। अहंकारस्याप्युपलभ्यमानत्वात् ॥ नहि रश्मी रादिरस्यां त्रिपा
योगस्यात स्यामेव गतं भवति ॥ एतदुक्तं भवति। यदि बुद्धिरुपलब्धी भवेत ततस्तस्यामुप
लब्धौ त्वमात्मनस्य धर्मस्येतन चेतन [illegible]। तस्माज्जडत्वेनोपलभ्यमानतयोपलब्धिकर्तृत्वानुप

पत्ते॥ यदाचोपलब्धो बुद्धेरकर्तृत्वं तदा यद्बुद्धेरुपलब्धृत्वे करणं तदेकल्पनीयं तथा च नाममा
त्रे विसंवाद इति तन्न भवतीत्याह न चैवं सति करणान्तरकल्पना बुद्धेरुपलब्धृत्वाभावात्॥ तर्हि
मित्यनीमकरणं बुद्धिरुपलब्धावालो चानुपलब्धेत्यत आह बुद्धेः करणत्वाभ्युपगमात्॥ अपमा
संधिं चैतन्यमुपलब्धिरात्मस्वभावो नित्य इति न तत्रात्मनः कर्तृत्वेनापि बुद्धेः करणत्वं॥ किं
तु चैतन्यमेव विषयावच्छिन्नं वृत्तिरिति चोपलब्धिरिति च व्याख्यायते॥ न स्यात् तद्विषयावच्छेदे
वृत्तौ बुद्ध्यादीनां करणत्वमात्मनस्तु तदुपधानेनाहंकारपूर्वकं कर्तृत्वं युज्यत इति॥ परान्तु तद्बु
ते॥ यदेतज्जीवानामौपाधिकं कर्तृत्वं तत्प्रवर्तनालोहोरोषु रागादिषु सत्स्वनेश्वरमपरं
प्रवर्तकं कल्पयितुमर्हति अति प्रसंगात्॥ न चेश्वरो हेयोपादानरहितो जीवान् साधयसा
धुनिकर्माणि प्रवर्तयितुमर्हति येन धर्माधर्मापेक्षेयातां जगद्वैचित्र्यमुपपद्येत॥ सापि
स्वतंत्रः कारणो धर्मैरेव जेत तन्प्रवर्त्तयेन्नाधर्मौ तत अत एवेरितारो तव सर्वथा
र्मिका एवेति सुखिन एव स्युर्न दुःखिनः॥ स्वतंत्रास्तु रागादिप्रयुक्ताः प्रवर्त्तमाना धर्मा

वी॰रा॰त्रृ॰

१८

धर्म्मप्रपंचप्रवर्तको वै चित्र्यमनुभवतीति युक्तं ॥ एवं च विधिनिषेधयोरपि वस्तुमितरथा तु सर्वपात्री
वोऽस्य तंत्रे ईश्वरेणैव प्रवर्त्यत इति वक्तं विधिनिषेधाभ्यां न हि वलवदनेलनलिलोघनघ
मानं प्रत्युपदेशोऽपेक्षा न्यात तस्मादेष ह्येव साधु कर्म कारयतीत्यादि श्रुतयः समस्तविधिनि
षेधश्रुतिविरोधाल्लोकविरोधाच्चैश्वर्यप्रशंसापरतया नेया इति प्राप्ते अभिधीयते। एष ह्येव
साधु कर्म कारयतीत्यादयः तावत्श्रुतयः सर्वव्यापारेषु जंतूनामीश्वरतंत्रतामाहुः स्मृति
वाध्यके न प्रशंसापरतया व्याख्यातुमुचिते ॥ न च श्रुतिस्मृतिहेतुस्वकल्पनीयतापेन प्रवर्त्तके
पुरागादि पुरुस्नत्सुतकल्पनाविरुद्धेता। न चेश्वरतंत्रत्वे धर्म एवं जंतूनां प्रवृत्तेः स्वरिवत्वमे
व नवैचित्र्यमिति युक्तं ॥ यद्यप्यपमीश्वरो वीतरागस्तथापि पूर्वजंतुकर्मापेक्षया जंतूनां धर्म
धर्मयोः प्रवर्त्तयन्न द्वेषपक्षपाताभ्यां विषमो नापि निर्घृणः ॥ न च कर्मप्रचयस्यादिरस्य
नादित्वात्संसारस्य न चेश्वरतंत्रत्वात्कर्तृ विधिनिषेधाभ्यामिति संप्रतं ॥ नहीश्वरः प्रवर्त्तक ल
रपवन इव जंतून्प्रवर्त्तयति अपि तु तत्तज्जंतून्पमनुरुध्यमानो रागाद्युपहारमुखेन एवं चेश्व

निष्प्राप्तिपरिहारार्थिनो विधिनिषेधावर्थवंतौ भवतः। तदनेनाभिसंधिनोक्तं परायत्तेपि हि क
र्तृत्वे करोत्येव जीव इति॥ तस्माद्विधिनिषेधशास्त्राविरोधात् लोकस्य सफलदर्शित्वात् एष ह्येव सा
धु कर्म कारयतीत्यादिश्रुतेः॥ अज्ञो जंतुरनीशोयमात्मनः सुखदुःखयोः। ईश्वरप्रेरितो गच्छेत् स्व
र्गं वा श्वभ्रमेव वेति। स्मृतेः ईश्वरतंत्रत्वमेव जंतूनां दर्शितं न तु स्वतंत्रत्वमिति सिद्धं। ईश्व
र एव विधिनिषेधयोः स्थाने नियुङ्क्ते तर्हि विधिनिषेधयोः फलं तदीश्वरे एव तत्प्राप्तिप्रतिपादितधर्मा
धर्मौ निरपेक्षे तस्मिन्निति विधिनिषेधयोरानर्थक्यं॥ न केवलमानर्थक्यं॥ विपरीतं चापद्यत
इत्याह तथा हि विहितकारिणमिति॥ प्रवीतेत्यादेः षं कृतनाशाकृताभ्यागमः प्रसज्येत अपि ते
हितापि मन्यत॥ अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके॥ अवांतर
संगतिमाह जीवेश्वरयोरिति॥ प्रयोज्यप्रयोजकभावरूपकार्योपकारभावः॥ अत्रापाततो विनि
गमनाहेतोरभावात् अनियमोऽनिश्चय इत्युक्तेः॥ निर्हेतुकाभासदर्शनेन भेदपक्षमालम्ब्या
हांशपदेति॥ द्वैविध्येपि तद्भावस्यान्वेष्यान्वेष्टृभावस्यांशांशिभावस्य भेदपक्षात् भावस्य नियम्यनियंतृभाव

बा॰२।३।

५८

वस्थाधाराधेयभावस्थानजीवपरमात्मनोर्भेदे कल्पते न च ब्रह्मदासा ब्रह्मकितवा इत्याद्याः श्रुतयोऽ
भा ब्रह्मकितवा ब्रह्मेत्यादि प्रतिपादनपरा जीवानां ब्रह्मणो भेदे ऽवं कल्प्यन्ते । न चैताभिर्भेदाभेद
प्रतिपादनपराभिः श्रुतिभिः साक्षाद्देशत्वप्रतिपादकास्वमते वर्णितपादेस्याविरुद्धाभतानीत्यादेः
स्मृतेश्च ममैवांश इत्यादेर्जीवानामीश्वरांशत्वसिद्धिः निरतिशयोपाधिसंपन्नश्चावरमाते
योगेनेश्वरः स्वांशानामपि निकृष्टोपाधीनामीष्ट इति युज्यते नहि तावदनेन एव स्येश्वरस्य जी
वाभावितुमर्हत्यंशः अपि च जीवानां ब्रह्मांशत्वे तत ब्रह्मण्येव वेदना भवेत् पादादिगता इव
वेदनादेवदत्तस्य ततश्च ब्रह्मांशभूतस्य समस्तजीवगतवेदनानुभवप्रसंग इति व
रं संसार एव मुक्तेः तत्र हि स्वगतवेदनामात्रानुभवादल्पमात्रं दुःखमनुभवति मुक्तस्तु स
मस्तजीववेदनाभागिति प्रपन्नेन मुक्तेरनर्थबहुलतया परिहर्तव्यता स्यादिति ॥ तथा भेदा
भेदयोः परस्परविरोधिनोरेकत्रासंभवाद्भोऽंशत्वं जीवानां । न च ब्रह्मैव सदंशं तस्तु जीवा इ
तियुक्तं सुखदुःखसंसारव्यवस्थाभावप्रसंगात् ॥ अनुदापरिहाराभावप्रसंगाच्च ॥ तस्माज्जी

णाएवापरमार्थभूतो न ब्रह्मैकमद्वये॥ अद्वैतस्यैतयस्तु जातिदेशकालाभेदनिमित्तोपचारादिति प्रोक्तेऽभि
धीयते॥ अनधिगतार्थबोधनानि प्रमाणानि विशेषतः शब्दः॥ तत्र भेदो लोकसिद्धत्वान्न मानेन प्रति
पाद्यः॥ अभेदस्त्वनधिगतत्वादधिगतभेदानुवादेन प्रतिपादनमर्हति। येन वाक्यमुपक्रम्यते मध्ये च
च परामृश्यते अंते चोपसंह्रियते तत्रैव तस्य तात्पर्यं। उपनिषदस्त्वद्वैतोपक्रमतत्परामर्शतदुपसंहारा
अद्वैतपरा एव युज्यंते। न च पतत्परामर्शदेवत्वाधिक्ये पुनः॥ अभ्यासे हि भेदपरत्वमपीस्यात्संभवति नात्म
त्वमपि प्रागेवोपचारितार्थत्वमिति तदुक्तं तस्माद्देहेंद्रियाविके स्थिते जीवभावः तस्य ब्रह्मणोऽनाद्यनिर्वच
नीयाविद्योपधानभेदेनैकस्यैव बिंबस्य दर्पणाद्युपाधिभेदात्प्रतिबिंबभेदाः॥ एवं चानुज्ञापरिहारौ
लौकिकवैदिकौ सुखदुःखमुक्तिसंसारव्यवस्था चोपपद्यते न च मोक्षस्य नर्थक्यं वहुलता। यतः प्रति
बिंबानामिव रूपामतावदातत्वादि जीवानामेव नानात्वे दर्शनाभिसंबंधो ब्रह्मणस्तु बिंबस्येव भेतदभिसं
वेधः॥ यथा च दर्पणापनये तत्प्रतिबिंबं बिंबभावेनावतिष्ठते। रूपासो प्रतिबिंबितमपि॥ एव
मविद्योपधानविगमे जीवो ब्रह्माभेदेति सिद्धं॥ जीवो ब्रह्मांश इवततं तत्पानंतवेश इति तात्पर्यार्थः॥

वो।१२।३।

सप्तदशसंख्यापरिमितो राशिर्गणः सप्तदशकः॥ तत्र पातुर्द्विकर्मेन्द्रियाणि वा प्राणिनि द्रमातुर्दि मनसीव
२० त्रिभेदमात्रेणामिलितं आप्येकीवत्पकमंतःकरणं शरीरे पंचविंशपाइति सप्तदशको राशिः। अनु
तोविधिरभिमतो न तु प्रवृत्तप्रवर्तना। अपौरुषेये प्रवर्तयितुरभिप्रायानुरोधासंभवात्॥ अ
त्पीयामस्तीषोमीयहिंसायां प्रवृत्तप्रवर्तनानुपपत्तेश्च॥ उपार्थेयिनियमांशेऽप्रवृत्ते। कः पु
नर्देहसंबंधः न हि कूटस्थनित्यस्यात्मनोऽपरिणामिनोऽस्ति देहेन संयोगः समवायो वान्यो
वा कश्चित्संबंधः। सकलधर्मातीतत्वादित्यभिसंधिः॥ उत्तरं देहादिसंघातोऽहमेवेत्यात्मनिवि
परीतप्रत्ययोत्पत्तिः। अयमर्थः॥ सत्यं नास्ति कश्चिद्देहादिभिः पारमार्थिकः संबंधः किंतु अवि
श्री द्याजनितात्मविषयविपर्ययी तावत्तिरहमेवदेहादिसंघात इत्येवंरूपा। अस्या देहादिसंघातात्मता
दात्म्येनभासते सोऽयं संबंधस्तावत्। तादात्म्यलक्षणः संबंधो न पारमार्थिक इत्यर्थः॥ ग्रन्थिमिति
ध्यात्मोदयात्। सम्यग्दर्शिनस्तु नाहीति। उत्तरं न तस्येति यदि तस्य समस्य लाभे देहादिसंघातोऽविद्यो
पदर्शित एकमेवाद्वितीयं ब्रह्मास्मीति सम्यग्दर्शनमभिमतं अतस्तद्वैतप्रतिविधिनिषेधयोरन

सम्यग्दर्शलेति ३

२

रवकुः

र्प्रसङ्गेन ॥ एतदेव विशदयति देहेन्द्रियोपादेयपोरिति चोदकेति गत्वाभिसंधिमाविष्करोति शरीरव्यतिरेकदर्शी
न एवामुष्मिकफलेषु कर्मसु दर्शपूर्णमासादिषु नियोज्य इत्यभिसंधिं निराकरोति न तस्य देहात्माभिमानात्
एतदुक्तं भवति तस्य इति ॥ यो ह्यात्मनः पाञ्चभौतिकाद्देहादुपपन्नाव्यतिरेकं वेदन तु सम्यक्त्वमुक्त्यादिसंघा-
तव्यतिरेकं तस्यामुष्मिकफले नाधिकारः सम्यक्त्वमुक्त्यादिव्यतिरेकवेदिनः प्रत्यवर्तत्वं तस्य देहात्माभिमानर-
हितस्य नाधिकारः कर्मणि तथा च न यथोक्तदेहात्माभिमानाधिकारः स्यात्तस्यात्मप्रभावादिति ॥ तेषां तु
संसारव्याख्यानं वेदशेषिकाणां कोऽन्यः सुखदुःखव्यवस्थापारमार्थिकी मिथ्याभूता वा ह वा आत्मानश्च सर्वगताः तेषां
वैषव्यतिकरः प्राप्नोतीति तत्र प्रस्तुतपदं कर्मसंसारव्याख्यानव्यतिकरं तावद्देहकल्पमिति । यादृशं कादृशो गुरुणा
संबंधः सर्वान्पुरुषान्प्रत्यविशिष्ट इति ततश्चेतेषु सुखदुःखे सर्वान्प्रत्यविशिष्टे न च कर्मनिबंधनाव्य-
वस्थाकर्मणः प्राकृतत्वेन प्रकृतेश्च साधारणत्वेनाव्यवस्थाता वदवस्थात तत्त्वोदयतिस्मादेतदिति ॥ अपव-
र्गोऽपि ॥ न च प्रधानं स्वविमुक्त्यर्थं व्यापनापवर्गं वर्त्तते किं तु पुरुषार्थं तं च पुरुषं प्रत्येकेन भोगापवर्गौ
पुरुषार्थौ साधयितुं प्रतिसमासाधिकारतया प्रवर्त्तते ॥ पुरुषान्तरं तु प्रत्यसमासाधिकारं प्रवर्त्तत एव

वी॰२।३। चमुक्तसंसारिव्यवस्थोपपत्तेः सुखदुःखव्यवस्थापि भविष्यतीति ॥ निरावरणेति न हीति ॥ सर्वेषां पुरुषाणां
विभुत्वात् प्रधानस्य च साधारणत्वादृष्टं पुरुषं प्रत्यनेन नापिः साधितदृष्टं तदेव नास्ति ॥ तस्मात्प्रयोज
२१ नविशेषेण विना हेतुं व्यवस्थाऽयोग्यापासा चाप्युक्ता हेत्वभावादित्यर्थः ॥ भवतु संसारव्यानामव्यवस्था
प्रधानसंसर्गापादृष्टस्य प्रधानसाधारणत्वात् कारणादीनां त्वात्मसमवायादृष्टं प्रत्यात्म
मसाधारणं तत्कृतश्च मनसा सहात्मनः स्वस्वामिभावलक्षणः संबंधोनादिरदृष्टभेदाना
मनादित्वात् । तथा च मनः संयोगस्य साधारणत्वेपि स्वस्वामिभावस्यासाधारणत्वादृष्टसंबंधादि
व्यवस्थोपपत्तेः ॥ न च संयोगोपि साधारणः नहि तस्य मनसश्चात्मांतरेण संयोगः स एव
स्वामिनापि । आत्मसंयोगस्य प्रतियोगिभेदेन भेदात् ॥ तस्मादात्मैकत्वस्यागमसिद्धत्वात् ॥
व्यवस्थापार्थं कत्वेप्युपपत्तेर्नानेकात्मकल्पनागौरवादागमविरोधाच्च ॥ एकत्वाविशेषत्वे
न च भेदकल्पनापामन्योन्याश्रयापत्तेः भेदे हि तत्कल्पना तत्तस्मभेद इति ॥ एतदेव कारणादमतदू
षणं भाष्यकृतानुप्रोढवादितया कारणादान्यत्यप्यदृष्टानियमादित्यादीनि सूत्राणि योजितानि

सांख्यमतदूषणमा। परास्पे वेति रोचयंते केचित्तदास्तां तावत्॥ इति श्रीवाचस्पतिमिश्रविरचिते
भगवत्पादशारीरकभाष्यविभागे भामत्यां द्वितीयस्याध्यायस्य तृतीयः पादः समा
प्तः॥ संपादितः वेश्री धरेण॥ श्री ॥ श्री ॥ श्री ॥ ॥